In conclusion it is my pleasant duty to acknowledge with thanks the ready help accorded to me in going through the proofs by P. Gopal Sastri Nene Vyākaraṇāchārya, Sadholal Scholar, Sanskrit College Benares; and to P. S'rī Rāma Sāstrī Bhāndārī Nyāyāchārya of the same institution I am indebted for revision of the book and for certain useful suggestions.

Government Sanskrit Library,
Sarasvatī Bhavana, Benares.
March 28, 1922.

Gopinath Kaviraj.

George Printing Works, Benares City.

विषयसूची—

विषय	पृष्ठाङ्क
गुणत्वजातिनिरूपणम्	१—१०
गुणसाधर्म्यनिरूपणम्	१०—१२
असमवायिकारणलक्षणम्	१२—१६
गुणवैधर्म्यनिरूपणम्	१६—१८
गुणवैधर्म्ये रूपादिनिरूपणम्	१८—१९
रूपादीनां पाकजत्वपरीक्षणम्	१९—४०
संख्यानिरूपणम्	४०—५७
परिमाणनिरूपणम्	५७—६५
पृथक्त्वनिरूपणम्	६५—७१
संयोगनिरूपणम्	७१—७५
विभागनिरूपणम्	७६—८५
परत्वापरत्वनिरूपणम्	८५—८७
बुद्धिनिरूपणम्	८७—९३
बुद्धिनिरूपणे संशयनिरूपणम्	९३—९५
बुद्धिनिरूपणे विपर्ययनिरूपणम्	९५—१०१
बुद्धिनिरूपणे स्वप्ननिरूपणम्	१०१—१०२
बुद्धिनिरूपणे प्रत्यक्षनिरूपणम्	१०२—१०४

भट्टवादीन्द्रकृतः

र स सा रः

नमस्यामो दूरीकृतभुवनभङ्गं भगवतो
वपुर्विश्वारम्भस्थितिलयनिदानं पुररिपोः ।
यदस्पृष्टं भोगैरपि दलितकामं करुणया
भवानीभ्रूभङ्गप्रणयकलहेभ्यः स्पृहयति ॥ १ ॥

तुष्टेर्मोचयत इति(पृ० १५९) । अत्र तुष्टिर्भगवदाज्ञाविषयीकृतनिवर्तककर्मजन्यो धर्मः । अतुष्टिः प्रवर्तककर्मजन्यौ धर्माधर्मौ । बद्धान् पुनर्बध्नते इत्यन्वयः । न तु मुक्तान् पुनर्बध्नते इति भ्रान्तिः कार्या, अदृष्टविरहे तत्कार्यदेहदुःखादेरनुत्पत्तेः "न स पुनरावर्तते" इति श्रुतिव्याकोपाच्च । कारागारं वन्दिशाला ।

'गुणानाम्' इत्येतावतैव चरितार्थत्वाद्व्यर्थं रूपादीनामिति, अत आह—गुणशब्देनेति । सत्यं, गुणशब्दस्य रूपादिचतुर्विंशत्यप्रधानाद्यनेकार्थत्वेऽपि रूपादिचतुर्विंशतिपरो नाप्रधानपर इति विवक्षिते नास्त्यतिप्रसङ्गः, किं तस्य रूपादिचतुर्विंशतिपरत्वमस्मिन् प्रयोगे रूपादिपदसन्निधिलभ्यमिति न तस्य वैयर्थ्यम् । 'गुण इतरेभ्यो भिद्यते गुणत्वाभिसम्बन्धात्' इत्यत्र गुणत्वादित्येव हेतुः । अभिसम्बन्धग्रहणं तु तस्य पक्षधर्मतादर्शनार्थम् । अन्यथाऽसमर्थविशेष्यापत्तेरिति । नासौ गुणत्वाभिसम्बद्ध इति । न तत्र गुणत्वमित्यर्थः । ननु किं व्यवस्थापकाननुसन्धानेऽनुगतमतेरभावे किं गुणत्वाभावः किं वा

व्यवस्थापकानुसन्धानेऽपि ? नाद्यः, अननुसंहिततुरगादि-व्यावृत्तसास्नादिसंस्थानानां गौरिति मतेरभावेन गोत्वस्याप्य-पन्हवप्रसङ्गात् । न द्वितीयः, द्रव्यादिव्यावृत्तरूपाद्यनुस्यूतव्यञ्ज-कानुसन्धानवतामनुगतमतेर्व्यवहारसिद्धत्वादित्याशङ्क्याह— व्यवस्थापकाभावादिति । गुणरहितत्व इति । अत्र 'अवगते' इति शेषः । रूपान्यत्वे रसान्यत्वे च सती-ति(पृ० १६०)। यदि त्वनपेक्षितकर्मान्यत्वेन विशेषितमुक्तलक्षणं गुणत्वं व्यवस्थापयेत् तर्हि रूपरसाद्येकैकविषयास्मदाद्यनपेक्षामा-श्रित्य रूपाद्येकैकान्यत्वेन विशेषितं गुणत्वं व्यवस्थापयेदिति रूपा-दिचतुर्विंशतेरपि गुणत्वापलापो गुणत्वानन्त्यं च स्यादित्यर्थः । निमित्तमन्तरेणेति । व्यवस्थापकमन्तरेणेत्यर्थः । तेनायम-र्थः—रत्नत्वबोधेऽपि चक्षुः तत्तद्रत्नजातिव्यवस्थापकसंस्थान-विशेषरूपविशेषादिबोधनमपेक्षते नोपदेशम् । तदभावेऽपि व्यवस्थापकानुसन्धानवतामिन्द्रनीलादिवर्गानुस्यूतपदार्थान्तर-व्यावृत्तवस्तुप्रतीतेः । रत्नोपदेशस्तु व्यवस्थापकविषय-जिज्ञासाद्वारेण तत्तत्सूक्ष्मरत्नजातिव्यवस्थापकबोधहेतुचक्षुः-सन्निकर्षविशेषमपेक्षते यदेवंलक्षणकं रत्नमिति । रत्नशब्द-प्रवृत्तिनिमित्तोपलक्षणोपदेशो रत्नजातिप्रतीत्युत्तरकालमुपमानो-दीरितन्यायेन रत्नजातीयरत्नशब्दजातीयवाच्यवाचकभाव-बोधोपयोगी भविष्यति । गोसदृशो गवय इत्युपदेशवतो गुणोपदेशस्तु व्यवस्थापकाभावात् न तदवगमद्वारा गुणत्व-बोधे चक्षुषः सहकारीत्यागमः । तथैव गुणत्वबोधक इति वाच्यम्, तच्चायुक्तम् । वैशेषिकोपदेशस्य परं प्रति प्रामाण्या-सिद्धेः । सिद्धौ वा पदार्थप्रमाणव्युत्पादनवैयर्थ्यादिति । तादि-

१ आदर्शपुस्तके 'रूपान्यत्वे सतीति'इत्येव पाठः ।

दमुक्तम्–निमित्तमन्तरेणोपदेशस्यागममात्रत्वादिति । मात्रपदेन निमित्तबोधद्वारा चक्षुःसहकारित्वं प्रामण्यं च निवारयति ।

अपि च किमुपदेशः केवल एव गुणत्वबोधे चक्षुःसहकारी किं वा सङ्गतिप्रतिसन्धानादिसहितः ? नाद्यः, अव्युत्पन्नानां सत्यप्युपदेशे रूपादिष्वनुगतमतेरभावात् । द्वितीयेऽपि किं रूपादिषु गुणत्वमित्युपदेशः किं वा रूपादयो गुणशब्दवाच्या इति ? नाद्यः, गुणत्वबोधात्पूर्वं गुणशब्दस्यागृहीतसङ्गतित्वात् । रूपत्वव्यतिरिक्तं सत्तावान्तरसामान्यं रूपेऽस्ति तदेव च रसादावित्यादिभङ्गीकृतोपदेशसहकृतं चक्षुर्गुणत्वे प्रमाणमित्यपि न युक्तम् । रूपत्वतदवान्तरव्यतिरिक्तसत्तावान्तरसामान्यं न रूपादिष्वित्यादिप्रतिवाद्युपदेशसहकृतं चक्षुर्गुणत्वाभावसाधकमिति परेणापि वक्तुं शक्यत्वात् । नापि द्वितीयः, गुणशब्दप्रवृत्तिनिमित्तगुणत्वप्रतीतेः पूर्वं रूपादौ गुणशब्दसङ्केतस्य ग्राहयितुमशक्यत्वात् । रूपत्वादिचतुर्विंशतिजात्याश्रयतया बुद्धिस्थीकृतासु सर्वव्यक्तिषु निष्कृष्टासु सङ्गतिज्ञानं गुणत्वबोधे चक्षुःसहकारीत्यपि न युक्तम् । रूपादिचतुर्विंशतिजात्याश्रयतया बुद्धिस्थीकृतासु नैता गुणशब्दवाच्या इति ज्ञानं गुणत्वाभाववबोधे चक्षुःसहकारीति वक्तुं शक्यत्वात् । उपदेशस्य च जातिबोधानङ्गत्वे तमन्तरेणापि ब्राह्मण्यबोधः स्यादिति चेत् ? सत्यम् । अस्त्येव पिण्डान्तरे व्यावृत्तमतिसूक्ष्मं तत्संस्थानभेदमधिगच्छतः । अन्यथा ऽऽकारत एवायं मया ब्राह्मण इति निर्णीत इत्युपदेशोत्तरकालीनव्यवहारो न स्यात् । यदि वा ब्राह्मणत्वव्यवस्थापकादृष्टविशेषोपगृहीतभूतजन्यत्वादेरप्रत्यक्षत्वाद् ब्राह्मण्यमनुमेयमेव । तत् सिद्धमुपदेशो न गुणत्वबोधोपयोगीति । तदाह–निमित्तमन्तरेणेति । निमि-

त्तमन्तरेण शब्दप्रवृत्तिनिमित्तमन्तरेण, गुणशब्दप्रवृत्तिनिमित्तमबुद्धिस्थीकृत्य । उपदेशस्य गुणशब्दवाच्यतावोधकवाक्यस्य । आगममात्रत्वाद् बोधकवाक्यत्वादित्यर्थः । तस्माद्धरं भूषण इति । योग्यव्यक्तिवर्तिनः सामान्यस्य योग्यत्वाद् गुणत्वाभावोऽपि योग्यानुपलब्धित एवावसीयते । न चोपदेशस्य जातिप्रतीतिहेतोरभावात्तदप्रतीतिः । तमन्तरेणापि गोत्वादिप्रतीतिदर्शनेनोपदेशस्य जातिप्रतीतिहेतुत्वाभावात् तेन जातेरभावात् गुणव्यवहारे गुणलक्षणमेव हेतुः । तच्चास्पर्शत्वे सामान्यवत्त्वे च सति द्रव्याश्रितत्वं, सामान्यवत्त्वे सति कार्यानाश्रयत्वादि वा कर्मण्यप्यस्तीति कर्माऽपि गुणः । न च कर्मान्यत्वेन लक्षणं विशेषणीयम्, अपेक्षितव्यावृत्तेरतिप्रसङ्गकत्वात् । 'कर्म गुणः सामान्यवत्त्वे स्पर्शानाधारत्वे च सति द्रव्याश्रितत्वात्, सामान्यवत्त्वे सति कार्यानाश्रयत्वात्' इत्यनुमानाच्च कर्म गुण इति न्यायभूषणकारः । गुणकर्मणोरेकत्वमिति वदतो गुणत्ववत् कर्मत्वमपि नास्ति व्यवस्थापकाभावादिति विवक्षितम्, उतास्ति कर्मत्वं गुणत्वमेव नास्ति ? नाद्यः, व्यवस्थापकज्ञाप्यस्यास्य रूपत्वादिवदनुभवसिद्धत्वात् । न च व्यवस्थापकाभावोऽपीत्याह—परस्परविरुद्धेति । अत्र संयोगविभागात्मककार्यद्वयजनकत्वं कर्मणो गुणादिभ्यो व्यावर्तकम् । परस्परविरुद्धत्वं तु संयोगविभागयोर्वैजात्यमाविष्कर्तुम् । तेन भेदकाभावाद् द्विष्ठकर्मजतया चैकरूपत्वाद्विभागः संयोग एवेति विभागसंयोगजनकत्वं संयोगद्वयजनकत्वमेव । तच्च संयोगद्वयजनके संयोगेऽप्यस्तीति न कर्मणो गुणादेर्व्यावर्त्तकमिति चोद्याभासः परिहृतः । नतु परस्परविरुद्धकार्यद्वयजनकत्वमेव कर्मत्वव्यवस्थापकमिति ग्राह्यम् ।

तस्य परस्पराविरुद्धधारावहनजनकनिश्चलीभूतमनस्त्वागन्द्रियादिसंयोगसाधारणत्वादिति । द्वितीये उत्तरमाह–तद्विपरीतं च कार्यमिति । तथाविधकार्याभावो विवक्षितः न त्वविरुद्धकार्यम् । अविरुद्धकार्यद्वयस्य सर्वगुणसाधारणस्याभावात् । विनाशकस्वकारणकार्यान्तररहितं कार्यमविरुद्धकार्यम्, तज्जनकत्वं सर्वगुणसाधारणमिति चेत्, न, स्वशब्दार्थाननुगमात् सर्वपदार्थानामेवंविधज्ञानादिजनकत्वाच्च । अनिमित्ततयैवंविधकार्यजनकत्वं विवक्षितमिति चेत्, न, अन्त्यावयविपरिमाणाद्यव्याप्तेः स्वकार्यान्तराविरुद्धवेगजनककर्मण्यतिव्याप्तेश्च । नन्वस्तु संयोगविभागाजनकत्वं कर्मव्यावृत्तं, रूपादौ तु गुणत्वं कुत इत्यत आह–ततस्तैरिति । कर्मावृत्तिसंयोगविभागाजनकवृत्तिजातीयैः संयोगविभागजनकत्वव्यवस्थाप्यजातिरहितैश्च भवितव्यमित्यर्थः । तत इति परामृष्टं हेतुं स्फुटयति–न हीति । अत्राप्येकजातीयत्वे इति संयोगविभागाजनकवृत्तिजातिरहितत्वे संयोगविभागजनकत्वव्यवस्थाप्यजातित्वे वेत्यर्थः । कार्यभेदनियमइति । एकत्र संयोगविभागजनकत्वमन्यत्र तदजनकत्वमित्यर्थः । ननु संयोगविभागाजनकत्वं कर्मव्यतिरिक्तसकलपदार्थनिष्ठामेव जातिं व्यवस्थापयेत् न रूपादिचतुर्विंशतिमात्रनिष्ठं गुणत्वमित्यपि न वाच्यमित्याह–अकर्मत्वेनैवेति । अकर्मत्वेनेति कर्मव्यतिरिक्तसकलपदार्थनिष्ठजात्येत्यर्थः । एवकारेण रूपादिचतुर्विंशतिनिष्ठजात्या नेति दर्शयति । तदिति । संयोगविभागाजनकत्वम् । तत्र हेतुमाह—अकर्मतयेति । संयोगविभागाजनकत्वं न कर्मव्यतिरिक्तसकलपदार्थनिष्ठजातिव्यवस्थापकं कर्मव्यतिरिक्तादपि द्रव्याद् व्यावृत्तेरित्यर्थः । द्रव्यकर्मव्यतिरिक्तसकलपदार्थनिष्ठजातिव्यवस्थापकमस्तु संयोगविभागाजन-

कत्वमित्यपि मन्दम् । समवायादौ जातिस्वीकारे सम्बन्धाभावादेर्बाधकस्य व्यक्तत्वात् । अदृष्टेश्वरविशेषगुणव्यतिरिक्तसंयोगविभागजनकत्वाभावः संयोगविभागाजनकत्वमिह विवक्षितम् । तेन न धर्मादावव्याप्तिः । सामान्यवत्त्वं चात्र विशेषणमुपादेयम् । तेन न ज्ञात्यादावतिव्याप्तिः । व्यक्तं चैतदग्रिमग्रन्थे ।

ननु सामान्यवत्त्वे सति कार्यानाश्रयत्वं कतिपयव्यक्तिनिष्ठामुक्तरीत्या जातिमाक्षिपति न वा ? आद्ये तदेव सत्तावान्तरगुणत्वमिति कर्मणोऽपि गुणत्वम् । द्वितीये त्ववमेव सामान्यवत्त्वे सति संयोगविभागाजनकत्वमपि न जातिकल्पनाबीजमिति गुणत्वापलापशङ्कां परिहरन्नुपसंहरति—तस्मादिति । यथेति । येन न्यायेन । तथेति । तेन न्यायेन । विजातीयत्वमिति । अत्र समानजातिनिषेधफल एवकारो द्रष्टव्यः । यथा न संयोगविभागजनकत्वं द्रव्यसाधारणीं कर्माणि जातिं व्यवस्थापयति सामान्यवत्त्वे सति कार्यानाश्रयत्वव्यवस्थाप्यया गुणकर्मजात्या सङ्करप्रसङ्गात्, संयोगविभागानपेक्षकारणत्वं तु पूर्वन्यायेन कर्मत्वं व्यवस्थापयति जातिसङ्करादेर्बाधकस्याभावात्; तथा सामान्यवत्त्वे सति कार्यानाश्रयत्वं न रूपादौ कर्मसाधारणीं जातिं व्यवस्थापयति संयोगविभागजनकत्वव्यवस्थाप्यया जात्या सङ्करप्रसङ्गात् । सामान्यवत्त्वे सति संयोगविभागाजनकत्वं पूर्वन्यायेन रूपादौ कर्मव्यावृत्तं गुणत्वं व्यवस्थापयति सङ्करादेर्बाधकस्याभावादित्यर्थः । जातिसङ्करादिबाधविरहलक्षणं जातिनियतमित्याचार्यरहस्यम् । जातिसङ्करश्चागृह्यमाणविशेषं जातिद्वयमपि वारयति सकृतजातिद्वयवत्, भूतत्वमूर्तत्ववद्वा गृह्यमाणविशेषां पुनरेकामेव जातिमिति व्यवस्था

परस्परपरिहारस्यासमावेशानिश्चायकत्वे गोत्वाश्वत्वयोरप्यसमाविष्टत्वनिश्चयाभावप्रसङ्गात् । तथा चाप्तवचनादेव सिततुरगभावे तुरगत्वान्नासौ गौरित्याद्यनुमानपूर्वकलोकव्यवहारविलयप्रसङ्गः । तस्मात् सङ्करो जातिबाधकः । तदेवं व्यवस्थापकबलात् गुणत्वमुपपाद्य व्यवस्थापकानुसन्धानसहितं चक्षुर्गुणत्वधीहेतुरित्युक्तम् । न चानुगतव्यवस्थापको बाधोत्तरकालीनोऽनुगतव्यवहारस्तत एवोपपन्न इत्यसिद्धा गुणत्वधीरिति वाच्यम् । सास्नादिमत्त्वानुसन्धानानन्तरगोव्यवहारस्य तत एवोपपत्तेर्गोत्वबुद्धेरपह्नवप्रसङ्गात् । अथ सास्नात्वाद्युपहितप्रतिपिण्डाभिन्नसास्नादिव्यक्तीनां गोव्यवहारहेतुत्वे गौरवमिति गोत्वबोधमाद्रियसे तर्हि सकलसंयोगविभागाजनकानां सामान्यवत्त्वसहितानां गुणव्यवहारहेतुत्वेऽपि तुल्यम् । एतेन कर्मापि गुण इति भूषणोऽपि प्रत्युक्तः । सामान्यवत्त्वे सति संयोगविभागाजनकत्वव्यवस्थाप्यजातेस्तन्निमित्तगुणव्यवहारस्य वा कर्मणि बाधादनुमानसहस्रेणापि साधयितुमशक्यत्वात् । सामान्यवत्त्वे सति कार्यानाश्रयत्वव्यङ्ग्यजातितन्निमित्तगुणव्यवहारसाधने चाप्रसिद्धविशेषणत्वात् । सामान्यवत्त्वे सत्यस्पर्शवत्त्वे सति द्रव्याश्रितत्वादिसाधने च साध्याविशिष्टत्वसिद्धसाधनत्वयोरन्यतरापत्तेः । सामान्यवत्त्वे सत्यस्पर्शवत्त्वे सति द्रव्याश्रितत्वं गुणव्यवहारनिमित्तमित्यप्ययुक्तम् । जातिसत्त्वे औपाधिकत्वानुपपत्तेः । किं चेदं सकलगुणव्यवहारनिमित्तं वैशेषिकपाणिनिप्रभृतीनां गुणव्यवहारस्य वा ? नाद्यः, यानासनसन्धिविग्रहादौ नीतिविदां सत्त्वरजस्तमस्सु साङ्ख्यानां गोदोहनादौ च तान्त्रिकाणां तदभावेऽपि गुणव्यवहारात् । नोत्तरः, कर्मव्यावृत्तवैशेषिकपाणिनिगुणव्यवहारस्य कर्मसा-

धारणनिमित्तकत्वानुपपत्तेः । पाणिनिप्रभृतयो हि शुक्लादिशब्दा गुणनिमित्ता न चलतीत्यादय इत्युपदिष्टवन्तः । यदि वा सर्वगुणानां सामान्यवत्त्वे सति संयोगविभागाजनकत्वं गुणत्वव्यवस्थापकमिति वदतो गुणत्वेऽनुमानमभिधित्सितं सामान्यवत्त्वे सति संयोगविभागाजनकाः सामान्यवत्त्वे सति संयोगविभागाजनकवृत्तितद्व्यावृत्तत्वानधिकरणसामान्यवत्त्वे सति संयोगविभागाजनकतदन्यवृत्तित्वानधिकरणसामान्यवत्त्वे सति संयोगविभागजनकनिष्ठजातित्वानधिकरणवन्तः धर्मत्वात् सम्प्रतिपन्नवदिति । न च गुणकर्मणोरन्येषां चैकधर्मवतामनयैव रीत्या अनपेक्षितजातिमत्त्वप्रसङ्ग इति वाच्यम् । तत्रोक्तसङ्करादिना जातिबाधात् । अन्वयिन्युपाधिविरहाच्च प्रतिबन्धसिद्धिः । इयं च महाविद्या तत्तद्व्यवस्थापकवत् व्यक्तिपक्षीकरणेन सर्वविप्रतिपन्नजातिसिद्धये प्रयोज्येति सङ्क्षेपः ।

द्रव्याश्रितत्वं द्रव्यकर्मादौ सत्त्वान्नेतरवैधर्म्यमित्याशङ्क्यायोगान्ययोगव्यवच्छेदेनेदमितरपदार्थवैधर्म्यं गुणानामिति व्युत्पादयति-अनाश्रितत्व नित्यत्वे चेत्यादिना(पृ० १६१)। सकलद्रव्याश्रित गुणव्यावृत्ते द्रव्यत्वेऽप्ययोगान्ययोगव्यवच्छेदेन द्रव्याश्रितत्वमस्तीति कथं गुणानामितरेभ्यो भेदकमत आह—सामान्यमपीति । द्रव्यादिषट्लक्षणान्यतमलक्षणोपहिताकारेणायोगान्ययोगव्यवच्छेदेन द्रव्याश्रितत्वमिह विवक्षितम् । न च तेनाकारेण द्रव्यत्वस्यान्ययोगव्यवच्छेदोऽस्ति । सामान्यरूपतया गुणादावपि सत्त्वादित्यर्थः । तादिदमयुक्तम् । सामान्यमपि सामान्यरूपतयेत्यत्र किं द्रव्यत्वमद्रव्ये वर्तते इति विवक्षितं, सामान्यान्तरं द्रव्ये वर्तते इति वा, सामान्यरूपता द्रव्यत्वे वर्तते इति वा, अद्रव्यवर्त्याश्रिता सामान्यरूपता द्रव्यत्वे वर्तते इति वा? नाद्यः,

व्याघातात् । न द्वितीयाद्यः, द्रव्यत्वस्य अन्ययोगसमर्थतानुपपादकत्वात् । अयोगान्ययोगव्यवच्छेदेन द्रव्याश्रितत्वं च किं द्रव्यवृत्तित्वे सत्यद्रव्यवृत्तित्वाभावः किं वा सकलद्रव्यवृत्तित्वे सत्यद्रव्यवृत्तित्वाभावः ? नाद्यः, कर्मादावपि सम्भवात् । न द्वितीयः, कस्याश्चिदपि गुणव्यक्तावसम्भवात् । न हि सकलद्रव्यवर्तिनी काचिद् गुणव्यक्तिरस्ति रूपादेरेकैकनिष्ठत्वात् । संख्यादेश्चातीतानागतद्रव्यानिष्ठस्यानुदयात् समवाय्यसमवायिकारणाभावात् । तस्माद् द्रव्याश्रितत्वं द्रव्यानाश्रितेभ्यो गगनादिभ्यो वैधर्म्यं न तु पटादिभ्योऽपीति व्याख्येयम् । अयोगान्ययोगव्यवच्छेदेन द्रव्याश्रितत्वस्य घटादिभ्यो वैधर्म्यरूपताव्युत्पादनन्तु पूर्वाचार्याभिप्रायेणेति । तदेतादिति । गुणत्वाभिसम्बन्धो द्रव्याश्रितत्वं चेति द्वयमित्यर्थः । द्रव्यलक्षणव्यावृत्त्या द्रव्यत्वनियतक्रियावत्त्वव्यावृत्त्येत्यर्थः । तत्र गुणत्वाभिसम्बन्धस्तावत्सति क्रियावत्त्वे गुणवत्त्वे वा न घटत इति दर्शयति–नहि तस्मिन्निति । क्रियावत्त्वेन गुणवत्त्वेन वा व्यवस्थापनं, द्रव्यत्वं दिक्पिण्डसंयोगविनाशात् समसमयोत्पन्नपरत्वान्त्यशब्दादेर्व्यावर्तत एव । तस्य च क्षणभङ्गित्वेनोत्तरकालभाविक्रियागुणाश्रयत्वानुपपत्तेः । तेन गुणत्वपरिहारेण घटादौ वर्तमानं द्रव्यत्वं द्रव्यत्वपरिहारेण च परत्वान्त्यशब्दादौ वर्तमानं गुणत्वमेकस्मिन् घटादौ सङ्करः प्रसज्यत इति द्रव्याश्रितत्वमपि क्रियावत्त्वे गुणवत्त्वे च सति न घटत इत्याह—नाप्यभिव्याप्येति । सङ्करेण गुणत्वे भग्ने गुणरूपतया ऽयोगव्यवच्छेदस्य वक्तुमशक्यत्वात् । शुक्लादिरूपेण चायोगस्य प्रमितत्वेन व्यवच्छेत्तुमशक्यत्वादिति भावः । मूर्त्यभावोऽपीति । अत्रेदानीन्तनभूतलरूपादयो न मूर्ता एतद्घटतदवयवान्यत्वे सती-

दानीमेतत्समानाधिकरणत्वादभावत्वदिति प्रयोगो द्रष्टव्यः । मूर्तत्वसमानदेशत्वयोरिति । मूर्तत्वैतद्घटतदवयवान्यत्वे सतीदानीमेतद्घटसमानदेशत्वयोरित्यर्थः ।

स्वाश्रयव्यवच्छेदोचितावान्तरसामान्यविशेषवन्त इति(पृ० १६३)। नवसु द्रव्येषु मध्ये यस्मिन् वर्तते तस्येतराष्टद्रव्येभ्यः स्वगतसामान्योपधानेन व्यवच्छेदहेतुर्विशेषगुण इत्यर्थः। तेन परिमाणमपि परमाणुत्वोपहितस्वाश्रयपरमाणुवर्गस्य परममहत्त्वोपहितमाकाशादेर्व्यवच्छेदकमिति विशेषगुणः स्यादिति निरस्तम्। परमाणुत्वादिविशेषितपरिमाणादेर्नवान्यतममात्रवृत्तित्वाभावात् स्वगतदुःखत्वादिविशेषितदुःखादेरीश्वराव्यापकत्वात् नात्ममात्रव्यवच्छेदकत्वमिति दुःखाद्यव्यापकत्वात् न नवान्यतमव्यवच्छेदकत्वं विशेषगुणलक्षणमिति नाशङ्कनीयमेव । नवान्यतममात्रवृत्तित्वं हि विशेषलक्षणं न तु सकलनवान्यतमवृत्तित्वम् । अत एव चित्रं रूपं पृथिवीविशेषगुण इति व्यपदिशन्ति ।

ननु नवान्यतमशब्देन नवसु मध्ये निर्धारितमेकं पृथिवी जलादि वा वाच्यम्, बहुष्वेकनिर्धारणे तमपोऽनुशासनात्। तथा च यदि नवान्यतमशब्देन पृथिवी विवक्षिता तदा नवान्यतममात्रवृत्तिविशेषगुण इति पृथिवीमात्रवृत्तिर्विशेषगुण इत्यर्थः स्यात्। तथा चापार्थिवविशेषगुणाव्याप्तिः । एवं नवान्यतमशब्देन जलाद्येकैकविवक्षायामव्याप्तिर्द्रष्टव्या । नवव्यतिरिक्तव्यतिरिक्तत्वं नवान्यतमत्वं नवस्वनुगतमस्तीति नाव्याप्तिरिति चेत्, न, एवं हि परमाणुत्वविशेषितपरिमाणादेर्नवव्यतिरिक्तव्यतिरिक्तपरमाणुमात्रवृत्तितया विशेषगुणलक्षणातिव्याप्तेः। संख्यादयश्च स्वगतसंख्यात्वादिविशेषिताः नवव्यतिरिक्तव्यतिरिक्तमात्रवृत्तय एवेति तैरप्यतिव्याप्तेः । तस्मान्नवान्यतममात्रवृत्तित्वं न विशेष-

गुणलक्षणम् । एतेन स्वसमवेतविशेष्यविशिष्टत्वे सति स्वाश्रयैकजातीयव्यवच्छेदको विशेषगुण इति व्योमशिवाचार्योक्तमपि लक्षणं प्रत्युक्तम् । स्वाश्रयैकजातीयपदेन नवान्यतमस्य विवक्षितत्वात् । अन्यथा स्वगतसंख्यात्वादिविशेषितैर्द्रव्यजातीयपृथिवीत्वादिव्यवच्छेदकैः संख्यादिभिरतिव्याप्तेः । गगनत्वविरहेणैकजातीयस्वाश्रयाव्यवच्छेदकशब्दाव्याप्तेश्च दुर्वारत्वादिति । तदसत् । नवान्यतममात्रनिष्ठत्वोचितसामान्यवान् विशेषगुण इति । अनेन पृथिव्यादिनवलक्षणातिरिक्तातिरिक्तानेकसमानाधिकरणत्वानापादकसामान्यवान् गुणो विशेषगुण इति व्युत्पादनाद् गुणत्वावान्तरजात्येकेन्द्रियग्राह्यजातीयस्नेहसांसिद्धिकद्रवत्वधर्माधर्मभावनाव्यातिरिक्तव्यातिरिक्तत्वं वोद्भिन्नं विशेषगुणलक्षणम् । एवमन्यत्रापि लक्षणान्तराभावे पदार्थान्तराद् व्यावृत्ततत्तत्पदार्थसार्थनिष्ठाचार्यव्यवहारोपपादकमपेक्षितपदार्थव्यतिरिक्तव्यतिरिक्तत्वं लक्षणमनुसन्धेयम् ।

ननु यथा द्रवत्वावान्तरवह्निसंयोगाविनाश्यद्रवत्वनिष्ठजातियोगात्सांसिद्धिकं द्रवत्वमम्भोविशेषगुणः तथा नैमित्तिकद्रवत्वावान्तरवह्निसंयोगविनाश्यद्रवत्वनिष्ठजातियोगान्नैमित्तिकमपि द्रवत्वं पृथिवीविशेषगुणः स्यात्, एवं वह्निसंयोगाविनाश्यवह्निसंयोगजद्रवत्वजातियोगान्नैमित्तिक[द्रव]त्वं तेजोविशेषगुणः स्यात्, तुल्ययोगक्षेमत्वात् । पृथिवीगुरुत्वं च वह्निसंयोगविनाश्यं तदुत्पाद्यं चाङ्गीकरणीयम् । पूर्वपटारम्भकैरेवारब्धे दग्धपटेऽपकृष्टगुरुत्वदर्शनात् । तेन वह्निसंयोगायत्तविनाशोत्पादं गुरुत्वं पृथिवीविशेषगुणः, सांसिद्धिकं च जलविशेषगुणः स्यात् । तत्कथं नैमित्तिकद्रवत्वं पृथिवीतेजसोः सामान्यगुण इत्यादि ?

उच्यते—यदि नैमित्तिकद्रवत्वं तदवान्तरं च जातिद्वय-

मितरजातिसमानयोगक्षेमतया नैमित्तिकद्रवत्वादौ प्रमितं तर्हि तदन्यत्वेन विशेषगुणलक्षणं विशेषणीयम् । नैमित्तिकद्रवत्वसामान्यगुणत्ववचनं च नैमित्तिकद्रवत्वाकारेण न त्ववान्तराकारेणेति व्याख्येयम् । अथ नैमित्तिकद्रवत्वादौ द्रवत्वावान्तरजातयः कथमपि जातिसङ्करादिकमुपेत्य शक्यनिरासाः तर्हि तत एव नातिव्याप्तिर्विशेषगुणलक्षणस्येति । गुरुत्वे च न वह्निसंयोगायत्तविनाशोत्पादत्वे प्रमाणमस्ति । दग्धपटादौ गुरुत्वापकर्षस्य पूर्वपटारम्भककतिपयावयवानामग्निसंयोगेन देशान्तरगमनादप्युपपत्तेः ।

ननु कर्मजसंयोगविभागादीनामपि कारणगुणपूर्वकत्वाभावान्नेदं बुद्ध्यादीनामितरवैधर्म्यमित्याशङ्क्याकारणगुणपूर्वकत्वमयोगव्यवच्छेदेन बुद्ध्यादीनामितरवैधर्म्यमिति दर्शयति—(पृ० १६५) एते अकारणगुणपूर्वका एवेति ।

(पृ०१६९)सामान्यतश्चात्र स्नेह इति । आरम्भकशब्देन कारणत्वमात्रे विवक्षिते इत्यर्थः । स्नेहविहितानिषिद्धप्रयत्नसूचकपदाभावात् न्यूनं भाष्यमित्याशङ्क्य भाष्ये संयोगपदेन संयोगविशेषग्रहकारणतया स्नेहं धर्माधर्मपदं तत्कारणतया विहितानिषिद्धप्रयत्नं बुद्धिस्थीकरोतीति दर्शयति—संयोगविशेषेणेति ।

(पृ०१७०) तल्लक्षणमग्रे वक्ष्यते इति । अयमभिप्रायः समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यमसमवायिकारणम् । न च तन्तुपटसमवेतद्वित्वारम्भके पटे समवायिकारणतयाऽवधृतसामर्थ्ये द्वित्वाधारतन्तुसमवेतेऽतिव्याप्तिः । समवायिकारणप्रत्यासन्नत्वेन सामर्थ्यावधारणस्य विवक्षितत्वात् । न च पटस्य द्वित्वादौ तत्समवायिकारणप्रत्यासत्तिमुपाधीकृत्य सामर्थ्यावधारणमित्यत्र बीजमस्ति, तत्कृतोऽतिव्याप्तिः । इयत्तावच्छिन्नपरिमाणं पुनरव-

च्छेदकतया द्रव्यविशेषणं क्रियासमवायिकारणबोध एवोपयुज्यते, द्रव्यत्वमिव समवायिकारणत्वबोधे, पृथिवीत्वमिव गन्धसमवायिकारणत्वबोधे; न तु क्रियायामवधृतसामर्थ्यम् । सामर्थ्यावधारणे वा तदप्यसमवायिकारणमिति तेन नातिव्याप्तिः । न चाभिघातनिमित्तकारणैः स्पर्शवेगगुरुत्वैरतिव्याप्तिः, तेषामपि समवायिकारणप्रत्यासन्नतया सामर्थ्यावधारणे ऽसमवायिकारणत्वात् । अवधारणे तत एव नातिव्याप्तिः । न च स्पर्शस्याभिघाताऽसमवायिकारणत्वाङ्गीकारे यद्यपि स्पर्शः वेगापेक्ष्यक्रियाभिघातमुत्पादयतीति स्पर्शस्याभिघाते निमित्तत्वमपीति ग्रन्थविरोधे नास्त्येव लाघवान्निमित्तत्वं, भवतु वा, तथापि नायं दोष इत्याभिप्रायस्य यद्यपि निमित्तत्वमपि तथापीत्यादिपदैरेवावधारणात् । न चाभिघातजन्यक्रियानिमित्तकारणे गुरुत्वेऽतिव्याप्तिः । तस्य प्रत्यासत्तिमात्रमपेक्ष्य स्वाश्रयसंयुक्तादिद्रव्यसमवेताक्रियाजनकत्वे कार्यैकार्थसमवायलक्षणप्रत्यासत्त्युपधानेन क्रियाहेतुत्वानवधारणात् । एतेनेश्वरसमवेतसंयोगाद्यारम्भकैरीश्वरज्ञानादिभिरतिव्याप्तिर्निरस्ता । तेषामीश्वरासमवेतकार्यवदीश्वरसमवेतकार्येऽपि प्रत्यासत्त्यनुपधानेनैव हेतुत्वात् । अवधारणे वाऽस्तु स्वैकार्थसमवेताक्रियां प्रत्यसमवायिकारणत्वं गुरुत्वस्य । न च गुरुत्वमभिघातजक्रियायां निमित्तमिति ग्रन्थविरोधः । तस्य स्वाश्रयसंयुक्तादिसमवेताक्रियाजनकगुरुत्वविषयत्वेनोपपत्तेः ।

ननु व्याप्यसंवेदनादीनां व्यापकसंवेदनादावेकार्थसमवायलक्षणां प्रत्यासत्तिमुपाधीकृत्य हेतुत्वावधारणम् । अन्यथा पुरुषान्तरसमवेतानामपि व्याप्यसम्वेदनानामपि पुरुषान्तरसमवेतव्यापकसम्वेदनादिहेतुत्वभावोपपत्तेः । एवमिष्टानिष्टसम्वेद-

नयोरपि इच्छाद्वेषौ प्रति, इच्छाद्वेषयोः प्रयत्नं प्रति, प्रयत्नस्य धर्माधर्मौ प्रति, धर्माधर्मयोः सुखदुःखादीनि प्रति, भावनायाश्च स्मृतिं प्रत्येकार्थसमवायमुपाधीकृत्य सामर्थ्यावधारणम् । अन्यथा पुरुषान्तरसमवेतेष्टसाधनज्ञानादेः पुरुषान्तरसमवेतेच्छाद्युदयप्रसङ्गात् । तस्मादतिव्यापकमसमवायिकारणमिति ।

न, आत्मविशेषगुणान्यत्वेन विशेषणात् । विशेषणेनानपेक्षितव्यावर्तनेऽतिप्रसङ्ग इति चेत्, न, अनपेक्षितस्यैव जगति विशेषणेन व्यावर्तनात् । तथाप्यनपेक्षितान्यत्वं न विशेषणमिति चेत्, न, ज्ञानादिव्यावृत्तरूपादिवर्गानुगतासमवायिकारणव्यवहारसाधकतया विशेषणान्तरतुल्ययोगक्षेमत्वात् । रूपाद्यन्यत्वं तु कणादादिवृद्धप्रयुक्तासमवायिकारणव्यवहारगोचराद्रूपादेर्व्यावर्तत इति न लक्षणान्तर्निविष्टमिति । इदमेवाभिसन्धायाह—(१)यथा च प्रत्यासत्त्यविशेषेऽपि नैषामसमवायिकारणत्वं तथा वक्ष्यत इति । यद्वा, सुखादयस्तावदवच्छिन्नात्मसमवायिकारणकाः प्रदेशवृत्तित्वात् । न च यद्देशावच्छिन्नात्मनि सुखं तत्रैव तत्कारणं धर्मः समवैति । तस्यानुष्ठानदेशावच्छेदेनैवात्मन्युदयात् । एवमधर्मसंस्कारयोरपि न दुःखस्मृतिसमानदेशत्वम् । तेन कार्यैकार्थसमवायविरोधात् न धर्मादावतिव्याप्तिः । न च व्याप्यज्ञानादीनामपि व्यापकज्ञानावच्छिन्नात्मप्रदेशसमवायोपधानेन सामर्थ्यावधारणे बीजमस्ति । अतिप्रसङ्गस्यैकार्थसमवायमात्रेण प-

---

(१) यद्यप्यत्र आदर्शपुस्तके 'तथा च' इति, एवमग्रेऽपि 'तथा च वक्ष्यते' इति पाठावुपलभ्येते तथाऽप्यर्थस्वारस्यात् गुणकिरणावली-पुस्तकेऽग्रे आदर्शपुस्तकेऽप्येतादृशस्यैवोपलम्भेश्चेत्थमेव निवेशितावितिबोध्यम् ।

रिहारात्। कथं तर्हि यथा च प्रत्यासत्त्यविशेषेऽपि नैषामसमवायिकारणत्वमित्यादिनाऽऽत्मविशेषगुणानां प्रत्यासत्त्यङ्गीकार इति चेत्? न, यत्र दैवाद्व्याप्यव्यापकसम्वेदनादीनामेकात्मप्रदेशसमवेतत्वं तदभिप्रायेणावच्छिन्नत्वातिरोधानेनैकात्मसमवेतत्वाभिप्रायेण वा प्रत्यासत्त्यङ्गीकारोपपत्तेः। न चैवं सति स्वानवरुद्धसंनिहितनभोभागसमवेतशब्दारम्भककार्यैकार्थसमवायविधुरप्रथमादिशब्दाव्याप्तिः। आद्यशब्दादिना क्रियति स्वावष्टब्धे क्रियति चान्यत्र नभसि शब्दारम्भात् अन्यत्र वल्गुप्रासमवायिकारणस्वरूपानुरोधेनैव तेषामसमवायिकारणत्वनिर्णयात्। अव्यवधानेनैकार्थसमवायप्रत्यासत्तिरिति विवेचनीयम्।

ननु प्रत्यासत्तिशब्देन कार्यैकार्थसमवायविवक्षायामवयविरूपाद्यारम्भकावयवरूपाद्यव्याप्तिः। तत्कारणैकार्थसमवायविवक्षायां द्रव्यारम्भकसंयोगाद्यव्याप्तिः। प्रत्यासत्तिमात्रविवक्षायां स्वाश्रयसंयुक्तदेहादिसमवेतकर्मारम्भकप्रयत्नादिनाऽतिव्याप्तिः। न च कार्यैकार्थसमवायकारणैकार्थसमवाययोरन्यदनुगतं रूपमस्ति। तत् कथमेतल्लक्षणमिति चेत्, न, कार्यैकार्थसमवायकारणैकार्थसमवाययोस्तदुभयव्यतिरिक्तव्यतिरिक्तत्वस्यान्यस्यापि कस्यचिदनुगतरूपस्य सत्त्वात्। अवयवसंयोगरूपादयश्च कार्यैकार्थसमवायं कारणैकार्थसमवायं च यथासम्भवमुपाधीकृत्यातिप्रसङ्गभयादवयवितद्रूपादावधृतसामर्थ्या इति अव्याप्तिर्नाशङ्कनीयैवासमवायिकारणलक्षणे इत्याचार्याः।

तन्न। समवायिकारणप्रत्यासन्नत्वेनावधृतसामर्थ्यमिति यदि समवायिकारणप्रत्यासन्नत्वेन सहितं विशेषितं चेति विवक्षितं, तन्न। समवायिकारणप्रत्यासन्नत्वस्य कारणत्वे प्रमाणाभावादनभ्युपगमाच्च। अथ समवायिकारणप्रत्यासन्नत्वेनोपलक्षि-

तस्य कारणत्वावधारणमिति विवक्षितं तदा तदुपलक्षितत्वं यदि तदधिकरणत्वं तदा तन्तुपटसमवेतद्वित्वारम्भकपटादावतिव्याप्तिर्दुर्वारैव । अथ तदुपधानेन अवस्थितकारणत्वं, तदपि न । अनिरुक्तेः । अथ समवायिकारणप्रत्यासन्नत्वेनेति समवायिकारणप्रत्यासन्नत्वस्य सामर्थ्यावधारणे हेतुत्वं विवक्षितं, तदपि न । समवायिकारणसमवायसमवायिकारणसमवायिकारणसमवायान्यतरप्रत्यासत्तेः सामर्थ्याधिगमहेतुत्वे मानाभावात् । तस्मात्समवायिकारणप्रत्यासन्नत्वेनेति तृतीयाया निरुक्तेः समवायिकारणप्रत्यासन्नत्वहेतुत्वयोरधिकरणमात्मविशेषगुणत्वानधिकरणमसमवायिकारणमिति वाच्यम् । तथा चोक्ता पटादावतिव्याप्तिर्दुर्वारा । जात्यादौ च तस्यापि यत्किञ्चित्समवायिकारणप्रत्यासन्नत्वे सति स्वगोचरसाक्षात्कारादौ सामर्थ्यावधारणात् । स्वसमवायिकारणप्रत्यासन्नत्वमित्यपि न । स्वशब्दार्थस्य सर्वानुगतत्वेऽतिव्याप्तेस्तदवस्थत्वात् । प्रतिव्यक्ति व्यावृत्तत्वे चाव्यापकत्वादिति ।

प्रकारभेदादिति(१) (पृ० १७२) । उपाधिभेदादित्यर्थः । उपाधिभेदमाह—अवयवान्तरेति । तथैव दर्शनादिति । अवयवान्तरदिगन्तरावच्छेदेनैव पटादौ रागद्रव्यसंयोगतदभावयोरात्मादौ सुखादितदभावयोरविसंवादिप्रत्यक्षेण सर्वैरुपलम्भादित्यर्थः । यस्तु सर्वलोकप्रसिद्धमप्यवयवान्तरावच्छेदेनैव रागद्रव्यतदभावयोरेकधर्मिसंसर्गरूपतदभावयोरेकदैकधर्मिसंसर्गानुपलम्भेन निरुन्ध्यात्, स निरुन्ध्यादेव घटतदभावयोः कालभेदेनाप्येकधर्मिसंसर्गं, गोत्वतदभावयोः कदाचिदप्येकधर्मिसंसर्गानुपलम्भात् । अथावय-

(१) मूलपुस्तके-'प्रकारभेदेन' इति पाठान्तरं वर्तते ।

वान्तरादिकं किमवच्छेदकान्तरावच्छिन्नं घटादिकमवच्छिन्नत्ति अनवच्छिन्नं वा ? आद्येऽवच्छेदकान्तरस्याप्यवच्छेदकस्याप्यवच्छेदकान्तरापेक्षेत्यनवस्था, द्वितीयेऽपि सर्वोऽपि पटोऽवयवान्तरादिनाऽनवच्छिन्न इति सर्वस्मिन् पटे संयोगतदभावापत्तिः; इति तु न युक्तम् । कालभेदोऽपि किं कालभेदावच्छिन्नं भूतलमवच्छिनत्ति अनवच्छिन्नं वा ? आद्येऽनवस्था, द्वितीये सर्वदैव भूतले घटतदभावापत्तिरिति वक्तुं शक्यत्वात् । अवच्छेदकान्तरमन्तरेणाप्यवच्छेदकमनतिप्रसङ्गि इति तु ममापि तुल्यम् । तस्मादेशकालावच्छेदप्रतियोगिभेदादिना भावाभावयोरविरोधः, अन्यथा तु विरोध इति स्थितिः । कार्यभेदेनेति । यवबीजं यवाङ्कुरे शक्तं न कलमाङ्कुर इति । देशभेदेनेति । बीजं सुक्षेत्रेऽङ्कुरजनने शक्तं नापरदेश इति ।

चक्षुर्मात्रग्राह्यत्वादीति । चक्षुर्मात्रग्राह्यत्वं रूपव्यवहारनिमित्तम् । त्वङ्मात्रग्राह्यत्वं स्पर्शव्यवहारनिमित्तम् । रसनाग्राह्यत्वं रसव्यवहारनिमित्तम् । घ्राणग्राह्यत्वं गन्धव्यवहारनिमित्तम् । अत्र मात्रपदव्यावर्त्याभावात् । किमयमुपाधिरननुसंहित एवोपहितव्यवहारहेतुरनुसंहितो वा ? प्रथमं दूषयति—अननुसंहितेति । अनुसन्धानपक्षेऽपि किं रसनादिव्यावृत्तस्ववर्गानुस्यूतचक्षुराद्याकारेणानुसंहित उपाधिः किं वेन्द्रियमित्यनेनाकारेणानुसंहितः ? प्रथमेऽपि किं तथाविधानुसन्धानं रूपत्वोपहितरूपोपलब्धेरन्यस्माद्रूपत्वोपहितरूपोपलब्धेर्वा ? नाद्य इत्याह—न च रूपत्वादीति । परस्परव्यावृत्तस्ववर्गानुगतचक्षुरादौ नैकैकरूपादिव्यक्त्युपलब्धयः प्रमाणं, तासां चक्षुर्विशेषादावेव नियतत्वात्, चक्षुर्विशेषादेश्चाव्यापकत्वेन रूपादिव्यवहारेऽनुपाधित्वादिति भावः । परस्परव्यावृत्तेष्विति । अत्र स्ववर्गानु-

गतेष्विति शेषः । रूपत्वोपहितरूपोपलब्धिः परस्परव्यावृत्त-स्ववर्गानुगतचक्षुरनुसन्धानहेतुरिति पक्षे रूपत्वं चक्षुर्ग्राह्यत्वं विवक्षितं रूपत्वजातिर्वा ? प्रथमं दूषयति—विशिष्टोपलब्धे-रेवेति । चक्षुषि ज्ञाते तद्ग्राह्यत्वलक्षणरूपत्वविशिष्टरूपोपल-ब्धिः, चक्षुर्ग्राह्यत्वलक्षणरूपत्वविशिष्टरूपोपलब्ध्या चक्षुषोऽवगम इत्यर्थः । इन्द्रियमित्यनेनाकारेणावगतचक्षुर्ग्राह्यत्वमुपाधिरिति पक्षं दूषयति—न चाविशिष्टेति । रूपत्वजातिविशिष्टरूपो-पलब्धिसिद्धचक्षुर्ग्राह्यत्वस्योपाधित्वपक्षे रूपत्वमवर्जनीयमित्यत आह—तस्मादिति (पृ० १७५) । यस्माच्चक्षुर्ग्राह्यत्वलक्षणरूप-त्वविशिष्टरूपोपलब्धिलिङ्गत्वे परस्पराश्रयमुपलब्धिमात्रलिङ्गत्वे चेन्द्रियमात्रसिद्धिस्तस्मादित्यर्थः । उन्नेयानीति । अत्राग्रे रूप-त्वसिद्धिरिति शेषः । रूपत्वादिविशिष्टरूपोपलब्धेरितरव्यव-च्छिन्नचक्षुर्लिङ्गत्वमाचार्यप्रयोगदर्शनेन द्रढयति—तथा चोच्यत इति । 'चक्षुः घ्राणादिभ्यो भिद्यते' इति प्रतिज्ञा पूरणीया ।

तत्र 'रूपं चक्षुर्ग्राह्यम्' इति भाष्यमयुक्तम् । चक्षुर्ग्राह्यत्वस्य घटादिभिरगुणैः संख्यादिभिश्च गुणैरतिव्याप्तिरित्याशङ्क्य तत्रेति पदेन गुणेषु मध्ये इति वदता गुणत्वे सतीति विशेषणं समर्प्यते, चक्षुर्ग्राह्यमिति चेन्द्रियान्तरव्यवच्छेदेन चक्षुर्ग्राह्यत्वं समर्पयति, तेन नातिव्याप्तिरित्याह—गुणेषु मध्ये इति ।

ननु वैधर्म्यप्रकरणे गुणान्तरसाधारणं नित्यत्वादि रूप-स्य न च वाच्यमित्याशङ्क्य वैधर्म्यान्तरोपयोगितया इदमुच्यत इति दर्शयति—यद्यपीति (पृ० १७६) । कारणविरोधि-नौ उत्पादकविनाशकौ वह्निसंयोगौ । ननु पुरोवर्त्येकमेव व-स्तु शुक्लात्मनाऽनुगतं, पटात्मना च व्यावृत्तं, तच्च शुक्लात्मना शुक्लपदेनोच्यते पटात्मना च पटशब्देन, तत्कथं शुक्लपदात्पट-

प्रत्ययः पटशब्दाद्वा शुक्लप्रत्यय इत्यत आह-नात्मभेद इति (पृ० १७७)। यदि शुक्ल इत्याकारः पटाकार एव तदा स एवानुवृत्तो व्यावृत्तश्चेति दुर्घटमित्यर्थः। किं च सामान्यविशेषात्मकं वस्तु इति पक्षेऽप्यनुवृत्तं सामान्यं व्यावृत्तो विशेषः तयोरैक्यं सामान्यविशेषात्मकतेति न तु वाच्यं विरोधात्, किन्त्वेकं निर्भागं वस्तु साधारणासाधारणव्यवहारयोग्यमिति सामान्यविशेषात्मकतेति वाच्यम्। तथा च शुक्लशब्देन निर्भागसामान्यविशेषात्मकवस्त्वभिधायिना पटप्रतीतिः पटशब्देन शुक्लप्रतीतिर्दुर्वारैवेत्यभिप्रायेणाह—**न च सामान्यविशेषभावेऽपीति**।

ननु यथा शाबलेयत्वादयो गोत्वावान्तरसामान्यविशेषा द्रव्यविशेषे समवायिनस्तथा नीलशुक्लादयो रूपशब्दाभिलप्यमानसामान्यावान्तरजातिविशेषा रूपाश्रयद्रव्यवर्तिन एवेति न रूपस्य प्रकारवत्त्वेन जातेरन्यत्वमिति न युक्तम्। शुक्लादीनां तारतम्याश्रयत्वेनाजातित्वादित्याह—**न च गोत्वेति**। नन्वस्तु तारतम्याश्रयत्वं जातित्वं च शुक्लादेरत आह- **न (च)तारतम्यमिति**। तारतम्यस्य जातित्वादिति भावः। ननु तारतम्यमपि शुक्लत्वावान्तरसामान्यं द्रव्यधर्म एवैकार्थसमवायात् शुक्लादेरवच्छेदकमिति न तदाश्रयत्वेन शुक्लादेरजातित्वमत आह—**न हि भवतीति**। यद्येकार्थसमवायात् शुक्लत्वमवच्छिन्द्यात् तारतम्यं तर्हि गोत्वमवच्छिन्द्यात् इति शुक्लतरः शुक्लतम इतिवद् गोतरो गोतम इति प्रत्ययः स्यादिति भावः। एतेनेति (पृ० १७८)। सत्येव धर्मिणि परमाणौ शुक्लाद्युत्पत्तिनिवृत्तिकथनेनेत्यर्थः। रसगन्धस्पर्शाः सुव्यक्ताः।

पार्थिवपरमाणुरूपादीति पृथिव्या विकारः पार्थिव इति

विकारतद्धितः "तस्य विकारः" (पा० सू० ४–३–१३४) इति सूत्रेण किं वा पृथिव्याः सम्बन्धी पार्थिव इति सम्बन्धप्रत्ययः "तस्येदम्" (पा० सू० ४–३–१२०) इति सूत्रेण ? नाद्यः, परमाणोर्नित्यत्वेनाविकारत्वात् । न द्वितीयः, परमाणोः पृथिव्या भेदाभावे तत्सम्बन्धानुपपत्तेः, इत्याशङ्क्य विकारतद्धितासम्भवेऽपि सम्बन्धतद्धितोऽयं भविष्यति परमाणोश्च पृथिवीत्वेऽपि कार्यपृथिवीतो भेदेन तत्कारणत्वरूपः सम्बन्धो घटत एवेत्याह–पृथिव्याः कार्यभूताया इति (पृ० १८२)। यद्वा, अत्र पृथिवीशब्देन पृथिवीत्वं विवक्षितं, तेन सह परमाणोराश्रयाश्रयिभावसम्बन्धस्तद्धितबीजं भविष्यतीत्याह–अथवेति । तस्मिन्नवस्थित एवेति । कार्यवत्स्वेव परमाणुषु पूर्वरूपनाशोत्तररूपाद्युत्पादौ, कार्यद्रव्यन्तु न विनश्यति अन्यच्च न जायते । कार्यद्रव्ये च पूर्वरूपादिविनाशोत्तररूपाद्युत्पादौ वह्निसंयोगजौ न त्वाश्रयनाशकारणरूपादिहेतुकाविति । परमाणव एवेति । एवकारेण कार्यद्रव्ये पाकं निवर्तयति । तेन कार्यद्रव्यरहितेषु परमाणुषु पूर्वरूपादिनिवृत्त्युत्तररूपाद्युत्पादौ, कार्यद्रव्ये तु पूर्वरूपादिनिवृत्त्युत्तररूपाद्युत्पादौ न च संयोगजौ, इति फलति ।

धर्मधर्मिणोरिति । रूपादिपार्थिवपरमाण्वोरित्यर्थः । पाकजोत्पत्तिसिद्धौ हि सत्येव पार्थिवपरमाणौ तद्रूपादीनां निवर्त्यमानत्वादि सिद्ध्यति । तच्च तेषामन्यादिभिः पार्थिवपरमाणुभिन्नैः सह साधर्म्यं, पार्थिवपरमाणुभिर्वैधर्म्यम्, अतः साधर्म्यवैधर्म्याभ्यां रूपादिपार्थिवपरमाण्वोस्तत्त्वविवेकः स्फुटः, स्फुटा भेदप्रमेत्यर्थः । पार्थिवपरमाणुतद्रूपादिविवेको न साक्षात्प्रयोजनमिति तस्य प्रयोजनपर्यवसायितां दर्शयति–स हीति ।

यदा हि रूपादिधर्मेभ्यः परमाणोर्धर्मिणो भेदः सिद्धः तदा तेनैव न्यायेन सुखादिभ्य आत्मनोऽपि भेदः सेत्स्यतीत्यर्थः । यद्वा, पाकजोत्पत्तिसिद्धौ पूर्वघटविनाश एव तत्तद्रूपादीनां विनाशो न तु सत्येव तस्मिन्निति अवयविरूपादेर्यावद्द्रव्यभावित्वसिद्धौ 'सुखादयो नावयविविशेषगुणा अयावद्द्रव्यभावित्वाद्'इत्यादिना सुखादेः शरीरगुणत्वनिषेधे शरीरव्यतिरिक्तात्मसिद्धिरिति पाकजोत्पत्तिव्युत्पादनस्यात्मतत्त्वविवेकः प्रयोजनमिति ग्रन्थार्थः । तथाच पाकजोत्पत्तिसमाप्तौ वक्ष्यति–'तदेवमवयविन' इत्यादि । कार्यद्रव्यं नश्यतीत्येकवचनप्रयोगादेकस्यैव नाशो लभ्यते न सर्वस्य द्व्यणुकादेरित्याशङ्क्याह–जात्यभिप्रायमिति (पृ० १८३) ।

अविचारितेति । अविचारितः अबाधितत्वेनानीक्षितः, आगमः पुराणादिः, तत्र श्रद्धा येषां ते तथोक्ताः लपन्ति वदन्ति । जन्माभ्यासमिति । पुनर्जायन्त इत्यन्वयेन परमाणौ पूर्वरूपादीनामप्युत्पत्तिर्लभ्यते । यदि परमाणुरूपादयः पूर्वं न जातास्तर्हि कोऽर्थः पुनर्जायन्ते इत्यस्य ? अनादित्वागमबाधमाह–अन्यथेति । अन्यस्माद्वह्निसंयोगाज्जायन्त इत्युक्ते पाकजत्वं लभ्यत एवेति व्यर्थं पाकजा इति भाष्ये पदमिसत आह–पाकजा इति । वह्निसंयोगाज्जायन्ते इत्युक्ते के जायन्ते इति न ज्ञायते । अतो लक्षणया रूपरसगन्धस्पर्शप्रतीत्यर्थं पाकजपदं न तु पाकजत्वप्रतीत्यर्थं, तेन न व्यर्थम् । रूपरसगन्धस्पर्शा इति पदचतुष्टयोपादाने गौरवं स्यादिति लक्षणावृत्त्या पाकजपदोपादानं, तदाह–सङ्क्षेपेणेति (पृ०१८४) । ननु य एव वह्निसंयोगः श्यामादीनां विनाशकः स एव च रक्तादीनामुत्पादकोऽस्तु, न च यो यस्य विनाशकः स

एव तस्योत्पादक इति नोपपद्यत इति वाच्यम् । विकल्पानुपपत्तेः । किं यो यज्जातीयस्य विनोशकः स तज्जातीयस्य नोत्पादक इति विवक्षितं किं वा यो यस्या व्यक्तेर्नाशकः स तस्या नोत्पादक इति ? नाद्यः, द्वितीयादिशब्दानां शब्दजातीयप्रथमादिशब्दविनाशकानां शब्दजातीयतृतीयादिशब्दोत्पादकत्वात् । न द्वितीयः, उपान्त्यशब्दस्यान्त्यशब्दविनाशकस्यान्त्यशब्दोत्पादकत्वात् । तस्मादेकस्यापि वह्निसंयोगस्य पूर्वरूपादिनिवर्त्तकत्वमुत्तररूपाद्युत्पादकत्वं चोपपद्यत इत्यनर्थकमन्यस्माद्वह्निसंयोगात्पाकजा जायन्त इत्यन्यपदं भाष्यगतमित्याशङ्क्याऽनुभाषणपूर्वकं परिहरति—यद्यप्येकस्येति । कार्यस्य विनाशोत्पाद्यरूपस्य आद्यतृतीयादिशब्दादेर्द्वितीयादिशब्देन शब्दत्वादिना सजातीयत्वेऽपीत्यर्थः । उपान्त्यशब्दो यदैवान्त्यशब्दमुत्पादयति तदैव विनाशयतीति दुर्घटं प्रतियोगिप्रध्वंसयोर्भिन्नकालत्वनियमादत उक्तं—कालभेदेनेति । यो यदुत्पादयति स एव तदेव विनाशयति इति विरुद्धमित्यत उक्तं—व्यक्तिभेदेनेति । कार्यविनाशविशिष्टं कालमपेक्ष्येति । अत्र वह्निसंयोगेनेति शेषः । रूपादिविनाशनादिति । रूपादिविनाशजननादित्यर्थः । सति कार्य इति । वह्निसंयोगस्य रूपादिविनाशं जनयतः परमाणुनिष्ठं द्व्यणुकं प्रतिबन्धकं; कार्यद्रव्यवति रूपाद्यविनाशनियमात्, तेन तदभावविशिष्टं कालमसावपेक्षते; एवं वह्निसंयोगस्य रूपादि जनयतः पूर्वरूपादयः प्रतिबन्धकाः, रूपादिरहित एव रूपाद्युत्पादनियमात्, तेन तदभावविशिष्टं कालमसावपेक्षते इत्यर्थः । नन्वस्तु वह्निसंयोगस्य पूर्वरूपादिविनाशे द्व्यणुकविनाशविशिष्टकालापेक्षित्वमुत्तररूपाद्युत्पादे च पूर्वरूपादिविनाश-

विशिष्टकालापेक्षित्वं, भेदस्तु कुत इत्यत आह–न चैतावन्तमिति । एतावन्तमिति रक्ताद्युत्पादसमयपर्यन्तमित्यर्थः कुत इत्यत आह–तेजस इति । अविलम्बो वेगस्तेन गमनमविलम्बगमनम् । एतदुक्तं भवति–येन तेजसा नोदनाभिघातौ घटादिद्व्यणुकारम्भकपरमाणुकर्मणः कारणं तस्मिंस्तेजसि स्वगतवेगतेजोन्तराभिघाताः परमाणुतेजोविभागारम्भककर्महेतवः सन्त्येवाद्व्यणुकारम्भकसंयोगविनाशक्षण एव द्व्यणुकारम्भकपरमाणुतेजोविभागारम्भकं तेजसि कर्मारभते न तु परमाण्वोर्विभागक्षणे । तथा सति द्व्यणुकारम्भकसंयोगनाशक्षणे द्व्यणुकारम्भकपरमाणुतेजोविभागः,द्व्यणुकनाशक्षणे द्व्यणुकारम्भकपरमाणुतेजःसंयोगनाश इति परमाणुतेजःसंयोगस्य पूर्वक्षणवर्तित्वाभावाद् द्व्यणुकनाशोत्तरकालभाविश्यामादिविनाशजनकत्वानुपपत्तौ य एव च वह्निसंयोगः श्यामादिविनाशकः स एव रक्ताद्युत्पादक इति विवक्षानुपपत्तेः। अत एव द्वयविभागपूर्वक्षणतत्पूर्वक्षणादौ तेजसि कर्मारम्भो निरस्तः । अतः परमाणुद्वयं संयोगनाशक्षण एव तेजसि कर्म द्व्यणुकनाशक्षणे परमाणुतेजसोर्विभागः श्यामादिनाशक्षणे परमाणुतेजःसंयोगविनाश इति स्वीकर्तव्यम् । तथा च परमाणुतेजःसंयोगे श्यामादिविनाशक्षणेऽविद्यमानेऽपि तत्पूर्वक्षणवर्तित्वात् श्यामादिविनाशजनकत्वं घटते रक्ताद्युत्पादपूर्वक्षणवर्तित्वाभावाच्च रक्ताद्युत्पादकत्वं न घटत एवेति तदर्थमन्य एवाग्निसंयोगः स्वीकर्तव्य इति । न च द्व्यणुकादिनाशक्षणे तेजसि कर्म श्यामादिविनाशक्षणे परमाणुतेजोविभागः रक्ताद्युत्पादक्षणे परमाणुतेजःसंयोगविनाश इति पूर्वक्षणवर्त्तित्वात् श्यामादिनाशकाग्निसंयोगस्यैव रक्ताद्युत्पादकत्वं घटत इति वाच्यम् । द्व्यणुकारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य परमाणुद्वयविभागेन

द्व्यणुकनाशक्षणे परमाणुतेजोविभागजननात् । तेन च श्यामादिविनाशक्षण एव परमाणुतेजःसंयोगस्य विनाशादिति । अथ द्व्यणुकविनाशविशिष्टं कालमपेक्ष्य परमाणुद्वयविभागेन श्यामादिनाशक्षणे परमाणुतेजोविभागः, तेन च रक्ताद्युत्पादक्षणे परमाणुतेजःसंयोगनाश इति तेजःपरमाणुसंयोगस्य रक्तादिपूर्वक्षणवर्तित्वमित्युच्यते, तन्न, कथञ्चित् पूर्वक्षणवर्तित्वेऽपि वह्निसंयोगस्य रक्ताद्यसमवायिकारणत्वानुपपत्तेः । विनश्यदवस्थस्यासमवायिकारणत्वानङ्गीकारात् । तथा च वक्ष्यति—'स्मर तर्हि समवायिनोऽसमवायिनश्च स्वरूपं, न हि भिन्नकालं तद्भवति'इति । यद्वा, 'तेजसोऽविलम्बगमनशीलत्वाद्'इत्यादेरयमर्थः-यदैव वेगवत्तेजोऽभिघातान्नोदनाद्वा कर्म तदैव वेगवत्तेजोऽन्तराभिघातान्नोदनाद्वा तेजोऽवयवेऽपि कर्म, विलम्बहेतोरभावात् । यदैव परमाण्वोर्विभागः तदैव तेजोऽवयवयोर्विभागः, यदैव परमाण्वोः संयोगविनाशः तदैव तेजोऽवयवयोः संयोगविनाशः, यदैव द्व्यणुकनाशः तदैव तेजोनाशः, यदैव श्यामादिविनाशः तदैव तेजःपरमाणुसंयोगविनाशः समवायिकारणनाशात् । अतः श्यामादिविनाशकाग्निसंयोगस्य रक्तादिपूर्वक्षणवर्तित्वाभावान्न रक्तादिजनकत्वमिति । तदयमन्य एवाग्निसंयोगो वक्तव्य इति सुष्ठूक्तम्—अन्यस्मायग्निसंयोगादिति ।

किञ्च, य एवाग्निसंयोगो रक्तादीनामुत्पादकः स एव श्यामादीनां विनाशक इति विवक्षितं किं वा य एव श्यामादीनां विनाशकः स एव रक्तादीनामुत्पादक इति ? आद्ये दूषणमाह—अपि चोत्पादकस्यैवेति । येन येनाग्निसंयोगेन यद्यद्रूपादिकमुत्पादितं तेन तेनैवाग्निसंयोगेन(तत्) तद्रूपादिकं विनाशितमिति पाकोत्तरकालं घटे रूपादि न स्यादित्यर्थः ।

द्वितीयेऽपि पक्षे यावदापाकमेकोऽग्निसंयोगः किं वा ऽनेकः? आद्ये दूषणमाह—विनाशकस्येति । अग्निसंयोगस्यैकत्वाद् यावदापाकं भेदाभावादविशेषे वैजात्याभावे पाकतारतम्यानुपपत्तेः । आपाकोपक्रमे ईषद्रक्ता घटादयः, आपाकमध्ये ततोऽपि रक्ताः, आपाकान्ते ततोऽपि रक्ता इति पाकवैषम्यं न स्यादित्यर्थः । द्वितीये दूषणमाह—पुनस्तेनैवेति । विनाशकस्योत्पादकत्वेऽपि य उत्पादनसमर्थः स विनाशसमर्थो भवत्येवेति तेनैवोत्पादितरूपादिविनाशान्नीरूपाः परमाणुघटादयः स्युरित्यर्थः । अग्निसंयोगान्तरेण रूपादयः पुनरुत्पद्यन्त इत्यत आह—पुनरुत्पादकस्येति । पूर्वदोषाननिवृत्तिरिति । रूपादिसन्तानपरावृत्तिप्रसङ्ग इत्यर्थः । सतर्कं प्रमाणमभिसन्धायोपसंहारव्याजेन प्रसङ्गारूढं करोति—तस्मादिति । इदं च यद्येकं प्रमाणं रूपादिनाशोत्पादधर्मिणमुपादाय प्रवृत्तं तर्हि हेतोरसिद्धिः, रूपादिविनाशोत्पादत्वस्य रूपादिविनाशे तदुत्पादे चासिद्धत्वात् । तस्मात्पार्थिवपरमाणुरूपादिविनाशः पार्थिवपरमाणुरूपाद्युत्पादकाग्निसंयोगजन्यो न भवति रूपादिविनाशत्वात् श्यामादिविनाशवत्, पार्थिवपरमाणुरूपादयः पार्थिवपरमाणुरूपादिविनाशकाग्निसंयोगजन्या न भवन्ति रूपादित्वात् श्यामरूपादिवदिति प्रमाणद्वयं द्रष्टव्यम् । उपसंहरति—तदिदमिति ।

ननु 'तस्मिन्विनष्टे' इत्यादि 'पाकजा जायन्ते' इत्यन्तं भाष्यं—'कार्यद्रव्यं तु विनश्यति इत्यत्र किं प्रमाणम् ?' इत्यस्योत्तरत्वेनावतारितं, तदनेन भाष्येण कार्यद्रव्यनाशे किं प्रमाणमुक्तं स्यादित्यत आह—एतेन पाक इति ।

ननु भवतु पूर्वरूपादिविनाशो मा भूत्कार्यद्रव्यनाश इत्या-

शङ्कानुग्राहकं तर्कमाह-अवयवीति। अवयविनाशावयविरूपादिविनाशयोर्हेतुमद्भावोऽप्यसिद्धः, प्रकृते सत्यपि कार्यद्रव्ये रूपादिविनाशशङ्कासम्भवादित्याशङ्क्याश्रयविनाशं विनाऽपि रूपादिविनाशो भवन् निर्हेतुको वा स्याद् वह्निसंयोगहेतुको वा ? इति विकल्प्य प्रथमं दूषयति-कारणं विनेति। द्वितीयं पक्षं शङ्कते-नान्विति (पृ० १८५)। यो हि वह्निसंयोगात्सत्येव घटे पूर्वरूपादिविनाशमिच्छति स किं घटादिमूलकारणपरमाणूनां कियतामेव वह्निसंयोगमिच्छति किं वा सर्वेषामिति ? आद्यं दूषयति—न कतिपयेति। अत्र कारणशब्देन यावन्तो वह्निसंयोगात् श्यामादिनिवृत्तौ रक्ताद्युत्पादकास्तावन्तो विवक्षिताः, तेन तावतां यदुक्तं रूपं तदेव घटादौ न स्यादित्यर्थः। कुत इत्यत आह-न हीति। येषां परमाणूनामग्निसंयोगो न जातः ते तावच्छ्यामा एव। तेन तदारब्धो घटादौ रक्तो न भवति किन्तु श्यामरक्तः स्यादिति भावः। द्वितीयं दूषयति-निःशेषपाक इति।

पूर्वावयविनाशे प्रमाणान्तरमाह-किं चेति। इह यद्यपि रूपाद्यन्तरोत्पत्तेरवयव्यन्तरोत्पत्तौ प्रामाण्यव्युत्पादनं मुख्यतया प्रतिभाति तथापि पूर्वद्रव्यविनाशं एवास्य ग्रन्थस्य तात्पर्यम्। अन्यथा '[१]तदेवं रूपाद्यन्तरोत्पत्तिरवयव्यन्तरोत्पत्तौ प्रमाणम्'इत्यादिना पौनरुक्त्यप्रसङ्गादिति। [२]अवयव्यन्तरेत्यनेन पूर्वावयविनाशो विवक्षितः, रूपादिरिति अवयवि-

---

[१]'तदेवं रूपाद्यन्तरोत्पत्तिः स्थूलद्रव्योत्पत्तौ प्रमाणम्' इति पाठो मुद्रितमूलपुस्तके १८६ पृष्ठे २० पङ्क्तौ।

[२]अत्रादर्शपुस्तके'अवयव्यन्तरेण इत्यनेन'इति पाठो वर्तते परं स पुनरुक्त्याभासक इत्युपेक्षितः।

रूपादिरित्यर्थः। कारणगुणपूर्वकत्वे हि रक्तादीनां परमाणावपि रक्ताद्युत्पादो वाच्यः, स चावयविरहित एव परमाणावित्युक्तं 'कार्यविनाशविशिष्टं कालम्'इत्यत्र। अवयविरहितत्वं च परमाणोः श्यामावयविपरम्परायाविनाशे सत्येव स्यादिति पूर्वावयविनाशसिद्धिरिति भावः। नियमादिति। व्याप्तेरित्यर्थः। ननु भवत्ववयविरूपादेः कारणगुणपूर्वकत्वनियमः, न चैतावता पूर्वघटादेर्विनाशः सिद्ध्यति; सत्येव पूर्वघटादौ वह्निसंयोगाद् घटादिपरमाणुनिष्ठश्यामादिनिवृत्तिः, ततोऽन्यस्माद् वह्निसंयोगात्परमाणुमात्रे रक्ताद्युत्पत्तिः, परमाणुरक्तादिभ्यो द्व्यणुके रक्ताद्युत्पत्तिरित्येवं घटादिरूपादेः कारणगुणपूर्वकत्वनिर्वाह इति शङ्कते–अग्निसंयोगादिति। अत्र च प्रथममिदमेव समाधानं वक्तव्यम्—यदि परमाणौ रक्तादीनामुत्पादोऽङ्गीकृतस्तर्हि कार्यद्रव्यरहित एवासावङ्गीकरणीयः 'कार्यविनाशविशिष्टं कालमपेक्ष्य'इत्यत्रोपपादितत्वात्; तथा च द्व्यणुकादेर्घटपर्यन्तस्य विनाशः। तदिदं समाधानं स्पष्टमुक्तप्रायमित्युपेक्ष्य समाधानान्तरमाह–न यत्रेति। घटादयो न वह्निसंयोगविनाश्यरूपादिमन्तः वह्निसंयोगजरूपादिरहितत्वाज्जलवत्। घटादीनां च वह्निसंयोगविनाश्यरूपादिमत्त्वे वह्निसंयोगजरूपादिमत्त्वप्रसङ्गः परमाणुवदिति तर्कः। घटादिरूपादौ वह्निसंयोगस्य जनकत्वसम्भवात् प्रकृतहेतोरसिद्धत्वं तर्कस्य चेष्टापादनदोषग्रस्तत्वमित्याशङ्क्य घटादिरूपादौ वह्निसंयोगस्यैव कारणत्वं मन्यसे किं वा कारणगुणसहितस्येति विकल्प्य प्रथमं दूषयति–अग्निसंयोगस्येवेति। अवयविरूपादेः कारणगुणपूर्वकत्वमेवासिद्धमिति शङ्कते–व्याहन्यतामिति। समाधत्ते–आमदशायामिति। द्वितीयं पक्षं दूषयति–तस्मात् परमाणुषु पाकादेवेति।

यथा परमाणुषु वह्निसंयोगात्कारणगुणनिरपेक्षाद्रूपादयः तथाऽवयविनि कारणगुणेभ्यो वह्निसंयोगनिरपेक्षेभ्यो रूपादयः, अन्यथा आमदशायां श्यामादीनामनुत्पादप्रसङ्गादिति भावः । केषुचित् पुस्तकेषु 'यद्यप्येकस्योत्पादविनाशहेतुत्वम्'इत्यादिकः 'आमदशायां श्यामादीनामनुत्पादप्रसङ्गात्'इत्यन्तो ग्रन्थसन्दर्भो 'द्व्यणुकविनाशक्षणमारभ्य पञ्चमे क्षणे पुनरन्यद् द्व्यणुकमुत्पद्य रूपादिमद्भवति'इति प्रक्रियामध्ये पठ्यते,तदनुपपन्नं, व्याख्यानपरग्रन्थसन्दर्भस्य एतद्व्याख्यानेकभाष्यव्याख्यानोत्तरकालभाविप्रक्रियाव्युत्पादनमध्येऽत्यन्तमसङ्गतत्वात् । तस्माद्[(१)'वह्निसंयोगात्]पाकजा[जायन्ते]इति रूपरसगन्धस्पर्शाः संक्षेपेणोक्ताः' इत्येतस्मादनन्तरं 'तस्मात् परमाणुपाकादेव रूपादिविनाशोत्पादौ'इत्येतस्माच्च पूर्वं 'यद्यप्येकस्योत्पादविनाशहेतुत्वम्'इत्यादिः 'आमदशायां श्यामादीनामनुत्पादप्रसङ्गात्'इत्यन्तो ग्रन्थसंदर्भो येषु पुस्तकेषु पठ्यते तान्येव शुद्धानि, अन्यानि तु लेखकदोषवशादसमीचीनपाठवन्तीति द्रष्टव्यम् ।

उक्तेऽर्थे प्रयोगानुपदर्शयति—तदमी प्रयोगा इति । पार्थिवावयविरूपादीनि । पार्थिवावयविरूपरसगन्धस्पर्शा इत्यर्थः । आश्रयविनाशादेवेत्येवकारेण वह्निसंयोगो निवर्त्यते । तेनाऽऽपाकनिक्षिप्तकुम्भरूपमाश्रयविनाशविनाश्यं वह्निसंयोगाविनाश्यं च अवयविरूपत्वात् पाटितपटरूपवादिति प्रयोगार्थः । एवं रसादीनपि पक्षीकृत्य प्रयोगा द्रष्टव्या इति ग्रन्थार्थः संमतः । किमत्र यत्किञ्चिदाश्रयविनाशविनाश्यत्वं साध्यम् उत पाकनिक्षिप्तकुम्भरूपाद्याश्रयनाशविनाश्यत्वम् ? नाद्यः, यत्किञ्चिदाश्रय-

(१) अत्रत्यानि कंसान्तर्गतान्यक्षराणि मुद्रितमूलपुस्तके नोपलभ्यन्ते १८४ पृष्ठे ३ पङ्क्तौ ।

विनाशविनाश्यत्वे आपाकनिक्षिप्तकुम्भविनाशासिद्धेरर्थान्तरत्वाच्च। नापि द्वितीयः, आपाकनिक्षिप्तकुम्भविनाशविनाश्यत्वस्य क्वचिदप्यप्रसिद्धत्वाद् दृष्टान्तस्य साध्यविकलत्वाच्च। सम्मुग्धे चाश्रयविनाशविनाश्यत्वे साध्ये रूपत्वाभाव उपाधिः। पक्षपक्षतुल्यव्यतिरिक्तस्य परमाणुरूपादेर्व्यावर्त्यत्वान्न पक्षेतरता। पार्थिवपटरूपे आश्रयविनाशविनाश्येऽपि रूपत्वसम्भवात् साध्यव्यापकताभङ्ग इत्यपि न। तत्राप्याश्रयविनाशविनाश्यत्वस्य परं प्रत्यसिद्धेः। अत एव सम्मुग्धेऽप्याश्रयविनाशविनाश्यत्वे साध्यविकलता दृष्टान्तस्य दुर्वारा। आपाकनिक्षिप्तकुम्भरूपमग्निसंयोगविनाश्यमवयविरूपत्वादित्याद्यपि न युक्तम्। आपाकनिक्षिप्तपृथिवीरूपत्वानधिकरणत्वेन सोपाधिकत्वात् तद्विरहेण सत्प्रतिपक्षत्वाच्च। पार्थिवपरमाणुरूपस्य पक्षतुल्यव्यातिरिक्तस्य व्यावर्त्यत्वान्न पक्षेतरत्वं, नापि प्रतिपक्षानुमाने दृष्टान्ताभाव इति। तत् कारणगुणेभ्य एवोपपद्यते तत एव तद्देवेत्यस्यार्थः—आपाकोद्धृतकुम्भरूपं कारणगुणजन्यम् अवयविरूपत्वात्पटरूपवदित्यादि, सोऽपि न, प्राचीनादेव न्यायात्। आपाकोद्धृतकुम्भकारणपरमेश्वरज्ञानादिना सिद्धसाधनस्य वैशेषिकैः परिहर्तुमशक्यत्वात्। न च कारणशब्देनात्र समवायिकारणं विवक्षितमिति नेश्वरज्ञानादिना सिद्धसाधनत्वमिति वाच्यम्। तस्यापि स्वाश्रितसकलकार्यं प्रति समवायिकारणत्वात्। न च समवायिकारणशब्देनाऽऽपाकोद्धृतकुम्भादिसमवायिकारणमात्रं विवक्षितमित्यपि युक्तम्। कुम्भावयवसंयोगादिनाऽर्थान्तरस्य दुर्वारत्वात्। न चाऽऽपाकोद्धृतकुम्भसमवायिकारणरूपजन्यमापाकोद्धृतकुम्भरूपमित्यपि युक्तम्, अप्रसिद्धविशेषणत्वादिति। घटादिद्व्यणुकेष्वित्यादेरयमर्थः—

परम्परयाऽऽपाकक्षिप्तघटारम्भकत्र्यणुकद्व्यणुकाग्निसंयोगास्त्र्यणु-
कारम्भकसंयोगविनाशकविभागारम्भककर्माऽसमवायिकारणं
त्र्यणुकद्व्यणुकाग्निसंयोगत्वात् मूषाग्निसंयुक्तसुवर्णत्र्यणुकद्व्यणु-
काग्निसंयोगवत् । यद्वा, आपाकनिक्षिप्तघटारम्भकत्र्यणुकद्व्यणु-
काग्निसंयोगा द्रव्यारम्भकसंयोगाविनाशजनकविभागजनककर्मा-
समवायिकारणं कार्यद्रव्यवदग्निसंयोगत्वात्स्थूलसुवर्णावयवा-
ग्निसंयोगवदिति । तेन यत्किञ्चित्पटाद्यारम्भकसंयोगवि-
रोधिविभागजनकतन्त्वादिक्रियाजनकत्वसिद्धेरर्थान्तरतेति नि-
रस्तम् । प्रत्यासत्तेरभावेन त्र्यणुकाग्निसंयोगस्य तन्तुकर्मा-
समवायिकारणत्वानुपपत्तेः । गगनाद्यग्निसंयोगादिना व्यभि-
चारश्च दूरनिरस्तः गगनादेर्द्रव्यानाश्रयत्वात् इति, सोऽपि
मन्दः । पक्षीकृतसंयोगाधिकरणवह्निनिष्ठत्वाभावेन हेतुद्वयस्य
सोपाधित्वात् । प्रकृतवह्निनिष्ठरूपादेर्विपक्षस्य व्यावर्त्यत्वान्न प-
क्षेतरता । उपाधिविपर्ययेण सत्प्रतिपक्षत्वात् प्रथमदृष्टान्तस्य सं-
दिग्धसाध्यत्वाच्च । मूषाग्निसुवर्णद्व्यणुकसंयोगस्य त्र्यणुकार-
म्भकसंयोगविरोधिविभागजनककर्माऽसमवायिकारणत्वे मा-
नाभावात्, त्र्यणुकविनाशस्य परमाणुसंयोगविनाशजन्य-
द्व्यणुकविनाशादप्युपपत्तेः । त्र्यणुकक्रियाविभागादिन्यायेन
सुवर्णचतुरणुकादेरन्त्यावयविपर्यन्तस्य विनाशोपपत्तेस्त्र्य-
णुकविनाशेऽपि मानाभावाच्च, सुवर्णस्य स्थूलावयवाग्निसंयो-
गस्य सुवर्णारम्भकसंयोगविरोधिविभागजनककर्मासमवायि-
कारणत्वे मानाभावेन द्वितीयदृष्टान्तस्य सन्दिग्धसाध्यत्वाच्च,
परमाणुसंयोगविनाशजन्यद्व्यणुकाश्रयविनाशादप्यन्त्यावयवि-
सुवर्णविनाशोपपत्तेः । एतेन द्व्यणुकशब्देन तदारम्भकः पर-
माणुरभिप्रेतः, तेन द्व्यणुकत्वत्परमाण्वग्निसंयोगः द्व्यणुकारम्भ-

कसंयोगप्रतिद्वन्द्विविभागजनकक्रियाऽसमवायिकारणं द्व्यणुकवत्परमाण्वग्निसंयोगत्वात्सुवर्णद्व्यणुकवत्परमाणुमूषाग्निसंयोगवदित्यपि व्याख्यानं निरस्तम् । तस्मादाचार्योक्तमनुमानत्रयमपि न युक्तमिति नवीनाः ।

तदयुक्तम् । प्रयोगार्थापरिज्ञानात् । तथाहि–पार्थिवावयविरूपादीति । आपाकनिक्षिप्ततत्कुम्भरूपादीत्यर्थः । आश्रयविनाशादिति । एतत्कुम्भविनाशादित्यर्थः । अवयविरूपादित्वादिति । एतत्कुम्भरूपादित्वादित्यर्थः । पाटितपटरूपादिवदिति व्यतिरेकदृष्टान्तः । प्रयोगस्तु आपाकनिक्षिप्ततत्कुम्भरूपमेतत्कुम्भविनाशविनाश्यमेतत्कुम्भरूपत्वान्न यदेवं न तदेवम्, यथा घटरूपम् । एवं रसादीनपि पक्षीकृत्य प्रयोक्तव्यम् । न चैतत्कुम्भविनाशविनाश्यत्वासिद्धेरप्रसिद्धविशेषणता । एतत्कुम्भविनाशः स्वस्वेतरावृत्तिकिञ्चिद्विनाशकधर्माधिकरणं मेयत्वाद्घटवत् इति सामान्यतः साध्यसिद्धेः । उपाधिप्रतिरोधौ तु केवलव्यतिरेकित्वादेवात्र दुर्वचौ । तन् सिद्धं श्यामादिनिवृत्तिपूर्वक्षणे कुम्भविनाशः।तत्कारणगुणेभ्य एवेत्यत्र तच्छब्देनाऽऽपाकोद्धृतकुम्भो विवक्षितः, कारणशब्देन तदवयवः, गुणशब्देन तद्गता रूपादयः । तत एवेति । आपाकोद्धृतकुम्भरूपत्वादित्यर्थः । तद्वदेवेति व्यतिरेकेण पटरूपाद्युदाहरणम् । प्रयोगस्तु आपाकोद्धृतकुम्भरूपमापाकोद्धृतकुम्भावयवरूपाऽसमवायिकारणम् एतत्कुम्भरूपत्वान्न यदेवं न तदेवं यथा घटरूपमिति । न चाप्रसिद्धविशेषणत्वम्, एतत्कुम्भावयवरूपं किञ्चिदसमवायिकारणम् अवयवरूपत्वात्तन्तुरूपवदित्यादिना साध्यप्रसिद्धेः । एवं रसादिष्वपि प्रयोक्तव्यम् । आश्रयविनाशादित्येवकारेण वह्निसंयोगाविनाश्यं विवक्षितम् । प्रयोगस्तु आपाकनिक्षिप्तकुम्भरूपादिकं स्वस्वेतरवृत्तित्वरहित-

वह्निसंयोगाविनाश्यधर्माधिकरणं मेयत्वाद् घटवदिति । कारण-गुणेभ्य एवेत्येवकारेण वह्निसंयोगाजन्यत्वं दर्शयति । प्रयोग-स्तु आपाकोद्धृतकुम्भरूपादि स्वस्वेतरावृत्तिवह्निसंयोगाजन्यध-र्माधिकरणं मेयत्वाद् घटवदिति । घटादिद्व्यणुकेष्वग्निसंयोगा इति आपाकनिक्षिप्तकुम्भमूलकारणद्व्यणुकत्वत्परमाण्वग्निसंयोग इत्यर्थः । द्रव्यारम्भकेत्यत्र द्रव्यपदेन प्रकृतद्व्यणुकमभिप्रेत-म् । क्रियाहेतव इति । क्रियासमवायिकारणमित्यर्थः । प्रयोगस्तु अयमापाकनिक्षिप्तकुम्भद्व्यणुकवत्परमाणुवह्निसंयोगः एतद्द्व्यणुकारम्भकसंयोगविनाशकविभागजनकक्रियासमवायि-कारणम् एतत्परमाणुवह्निसंयोगत्वान्न यदेवं न तदेवं, यथा घट इति । न चैतद्द्व्यणुकारम्भकसंयोगविनाशकविभाग-जनकक्रियासमवायिकारणासिद्धेरप्रसिद्धविशेषणता । एतद्-द्व्यणुकारम्भकसंयोगोऽसमवायिकारणजन्यक्रियाजन्यविभागवि-नाश्यत्वव्यतिरिक्तैतद्धर्मत्वानधिकरणाधिकरणं मेयत्वाद्धटवदिति तत्सिद्धेः । एवमन्येऽपि यथास्थानमाचार्यप्रयोगाः केवल-व्यतिरेकितया समर्थनीयाः ।

भोगिनामदृष्टापेक्षादात्माणुसंयोगादित्यत्र भोगिनामणुसं-योगादित्येतावतैवाऽऽत्माणुसंयोगो लभ्यते भोगिनामात्मत्वादे-वेति व्यर्थमात्मग्रह[णमि]त्यत आह—आत्मग्रहणमिति (पृ. १८६)। स्फुटार्थमिति। आत्मन एव भोगित्वं न तु सांख्य-वदन्तःकरणस्येति निश्चयार्थम्, अतो न व्यर्थमित्यर्थः। अणुषु कर्मोत्पत्ताविति यत्राणुशब्देन यदि द्व्यणुकमभिप्रेतं तर्हि द्व्यणुकेषु कर्मोत्पत्तौ द्व्यणुकानामेव संयोगः, ततश्च त्र्यणुकोत्पत्तिरेव स्या-दिति द्व्यणुकादिप्रक्रमेणेति न घटत इत्याशङ्क्याणुपदं व्याचष्टे-अणुष्विति चेति । जात्यभिप्रायमेकवचनं परमाणुसं-

योगानां बहुत्वादिति शेषः । रूपादेव रूपमुत्पद्यते इति । अत्र पूर्वोक्तव्यतिरेकि प्रमाणम् । न स्पर्शादिति । अत्र घटावयवस्पर्शो न रूपासमवायिकारणं स्पर्शत्वाद्वायुपरमाणुस्पर्शवदित्यादि । एवं घटावयवगन्धो रसश्च न रूपासमवायिकारणं गन्धत्वाद्रसत्वादन्त्यावयविगन्धरसवदिति प्रयोक्तव्यम् । ननु वायुपरमाणुस्पर्शोऽपि रूपासमवायिकारणमस्तु तेन साध्यविकलो 'वायुस्पर्शवत्'इति दृष्टान्त इत्यत आह–वायावपीति । तदुत्पत्तिप्रसङ्गादिति । रूपोत्पत्तिप्रसङ्गादित्यर्थः । यदि वाय्ववयवस्पर्शो रूपासमवायिकारणं तर्हि तदारब्धे वायौ रूपोत्पत्तिर्दुर्वारेत्यर्थः । रसगन्धयो रूपासमवायिकारणत्वे बाधकं तर्कमाह–रसादेस्तदुत्पत्ताविति । रूपस्य रसासमवायिकारणत्वे रसत्वप्रसङ्गःरसवदेव । एवमनुद्भूतावयवरसाऽसमवायिकारणत्वाद् वज्रादिरूपस्यानुद्भूतत्वप्रसङ्गः । एवमुद्भूतमाधुर्यावयवरसशर्करादिरूपादौ माधुर्योद्भवप्रसङ्गः शर्करामाधुर्यवदेव । रूपस्य रसासमवायिकारणत्वे बाधकं तर्कमाह–एवं रूपादिति । पार्थिवावयवरूपं न रसासमवायिकारणं रूपत्वात् तेजःपरमाणुरूपवदिति भावः । तेजःपरमाणुरूपमपि रसासमवायिकारणमस्तु ततश्च साध्यविकलत्वं दृष्टान्तस्येत्यत आह–तेजसश्चेति । यदि तेजःपरमाणुरूपं रसासमवायिकारणं स्यात् तर्हि द्व्यणुकादिप्रक्रमेण महति तेजसि जातो रस उपलभ्येतेत्यर्थः । नन्वनेन भाष्येण द्रव्यान्तरोत्पत्तिरित्यर्थः । तदवयवान्तरादौ किं प्रमाणमुक्तं स्यादित्यत आह—तदेवमिति । स्थूलद्रव्योत्पत्ताविति । स्थूलद्रव्यान्तरोत्पत्तावित्यर्थः । द्रव्यारम्भानुगुणावयवक्रियाया इति[पृ.१८७] । अत्र द्रव्यारम्भानुगुणक्रियात्वमवयवित्वञ्च एकैकं स्पर्शादिमत्युत्पादनियतं न तु विशिष्टं

व्यभिचाराभावात् । ननु स्पर्शाद्युत्पत्तेः पूर्वं तन्त्वादौ क्रियोत्पत्तौ बाधकाभावात् कथमवयवक्रियात्वादेः स्पर्शादिमत्युत्पादानियम इत्याशङ्कां वारयितुं यथाक्रमं परमाण्वादौ तन्त्वादौ च स्पर्शादिविरहक्रिया भवन्ती किं रक्ताद्युत्पत्तितन्त्वाद्युत्पत्तिक्षणव्यतिरिक्ते क्षणे भवेत् किं वा रक्ताद्युत्पत्तिक्षणे एवेति विकल्प्य प्रथमं दूषयति—रूपादिविरहेणेति । रूपस्पर्शाद्युत्पत्तौ श्यामादिचरमवृत्तेर्द्रव्यस्य च कारणत्वात् द्वितीयादिक्षणे स्पर्शविरहो दुर्घट इत्यर्थः । द्वितीयं दूषयति—कर्मणश्चेति । रक्ताद्युत्पत्तिक्षणे द्रव्यान्तरभवक्रियाहेतोः स्पर्शस्याभावात् । तन्त्वाद्युत्पत्तिक्षणे चाभिघातादीनां सर्वेषां कर्महेतूनामभावाच्च कर्म दुर्घटमित्यर्थः । तर्कशेषमिति । अवशिष्टं तर्कमित्यर्थः । कार्यद्रव्यविनाशाभावे तद्रूपादिविनाशो न स्यात् तद्धेतुकत्वादित्युक्त एव तर्कः, अयं त्ववशिष्ट इति भावः । अवयविनः प्रासावपीति । अवयविनो वह्निसंयोगोऽपीत्यर्थः । बाह्यावयवावष्टम्भेनेति । बाह्यैर्घटाद्यवयवैरग्नेः प्रतिषिद्धत्वेनेत्यर्थः । कार्यद्रव्यविनाशादिति । यदि सकलत्र्यणुकारम्भकद्व्यणुकमध्ये तेजःप्रवेशो नास्ति न तर्हि तन्मध्यवर्तिषु परमाणुषु पाकः, अतः सकलत्र्यणुकारम्भकद्व्यणुकमध्ये तेजःप्रवेशे सति परस्य द्व्यणुकसंयोगविनाशसकलत्र्यणुकादिकार्यविनाशो दुर्वार इत्यर्थः । ननु सकलद्व्यणुकमध्ये तेजःप्रवेशादस्तु नाम त्र्यणुकादिकार्यविनाशः, द्व्यणुकनाशस्तु निर्बीजः परमाणुद्वयमध्ये तेजःप्रवेशनमन्तरेणापि आरब्धद्व्यणुकपरमाणुतेजःसंयोगमात्रेण वा पाकोत्पत्तिरित्याशङ्क्य भाष्यतात्पर्यमाह—अयमाशय इति । पार्थिवद्व्यणुकारम्भकपरमाणुतेजःसंयोगः पार्थिवपरमाणौ द्व्यणुकारम्भकसंयोगविनाशक-

विभागजनकं कर्म जनयत्येवेति द्व्यणुकविनाशोऽपि दुर्वार एवेत्यर्थः। यत्तज्जन्माऽतिरिक्तकर्मजनकत्वादिति । ततो वेगातिशयस्पर्शातिशयवत्तेजसो जन्म यस्याभिघातादेः स तज्जन्मा असौ कार्यद्रव्यं पूर्वव्यूहात्प्रच्यावयति । अत्र हेतुरतिरिक्तकर्मजनकत्वादिति । यत्कर्म द्रव्यारम्भकसंयोगविरोधिविभागजनकं न भवति ततोऽतिरिक्तं द्रव्यारम्भकसंयोगविनाशकविभागजनकं पार्थिवपरमाणौ यत्कर्म तज्जनकत्वादित्यर्थः। क्वचित्तु यत्तज्जन्माभिघातः कर्मजनकत्वादिति पाठः स तु सम्यगेवेति । अन्यथेति[पृ.१८८]। यदि तेजःसंयोगः सर्वव्यूहान्न प्रच्यावयतीत्यर्थः कुत इत्यत आह—सान्तरत्वे इति । निविडावयवारब्धक्षीरादेः सान्तरत्वानुपपत्तौ अन्तरालमध्ये न प्रविशति । प्रवेशनमलभमाने वह्नौ क्षीरादेरूर्ध्वतापो न स्यादित्यर्थः । ननु युक्तौ तेजःसंयोगेन क्षीरादेः पूर्वव्यूहभङ्गव्यूहान्तरोत्पादौ आरम्भकशैथिल्यात्, घटाद्यारम्भकसंयोगस्तु कठिन इति न तत्र तेजःसंयोगेन पूर्वव्यूहभङ्गव्यूहान्तरोत्पादाविति शङ्कते—मृदुसंयोगेनेति। तन्दुलादीनामिति। अत्र कठिनसंयोगवतामिति शेषः । तथादर्शनादिति । पूर्वव्यूहभङ्गव्यूहान्तरोत्पाददर्शनादित्यर्थः । ननु भवतु तण्डुलादीनां क्षीराद्यपेक्षया कठिनसंयोगारब्धत्वं, घटाद्यपेक्षया मृदुसंयोगारब्धत्वमेवेति तेषामपि वह्निसंयोगात्पूर्वव्यूहभङ्गव्यूहान्तरोत्पादौ संभवतः, न तु घटादेस्ततोऽपि कठिनसंयोगारब्धस्येति शङ्कते—तेषामपीति। समाधत्ते—नातिदृढानामिति । घटापेक्षयाऽतिकाठिनसंयोगारब्धवज्रादेर्वह्निना पूर्वव्यूहभङ्गव्यूहान्तरोत्पाददर्शनात् घटादेस्तौ सुतरां दुर्वाराविति सिद्धो द्व्यणुकादेर्नाश इत्यर्थः । वज्रादेरिति । कठिनसंयोगारब्धत्वेऽपि वज्राग्निसंयोगस्य सा-

तिशयत्वाद् वज्रे पूर्वव्यूहभङ्गव्यूहान्तरोत्पादौ संभवतो घटादिवह्निसंयोगस्य तु निरतिशयत्वान्न तत्र पूर्वव्यूहभङ्गव्यूहान्तरोत्पादौ संभवत इति शङ्कते—सातिशय इति । पूर्वव्यूहभङ्गव्यूहान्तरोत्पादकवज्रादिवह्निसंयोगेऽतिशयो भवन् किं प्रथमादिवज्राग्निसंयोगादिव्यावृत्तो जातिविशेषो भवेत् किं वा बहुतरप्रथमादिवज्राग्निसंयोगसाहित्यम् ? नाद्यः, मानाभावादित्याह—क इति । द्वितीयं शङ्कते—बह्वभ्यास इति । प्रथमादिवज्राग्निसंयोगानामन्त्यवज्राग्निसंयोगसाहित्यं किं स्वजन्यातिशयद्वारेण किं वा स्वरूपेण ? आद्ये पक्षे दूषणमाह—न प्रथमस्येति । प्रथमादिसंयोगोऽतिशयहेतुरिति सिद्धान्तविरुद्धमित्यकिञ्चित्करत्वम् । द्वितीयं दूषयति—न हीति । ननु पूर्वव्यूहभङ्गव्यूहान्तरोत्पादे वह्निसंयोगस्य प्रथमादिबहुतरसंयोगसाहित्यमनुपयोगि तर्हि तेनैव न्यायेन घटादिपाकेऽपि वह्निसंयोगस्य प्रथमादिवह्निसंयोगसाहित्यमनुपयोगीत्यापाकनिहितकुम्भे प्रथमक्षणवत् क्षणान्तरपाके विशेषो न स्यादित्याशङ्क्योपसंहारव्याजेन परिहरति—तस्मादिति । अत्र पूर्वरूपविनाशसहितस्याग्निसंयोगस्योत्तरोत्तररूपादिविशेषजनकत्वात् पाके विशेषो न घटत इति विवक्षितम् । शरीरादौ पाकजोत्पत्तिः प्रत्यहं व्युत्पादनीयेति ख्यापयितुं शरीरादेर्दृष्टान्ततयोपपादनं न तूभयसिद्धतया । परमाण्वपगम इति । परमाणुसंयोगनाश इत्यर्थः । अन्यथेति । यद्यसमवायिकारणसंयोगनाशो न द्व्यणुकादिनाशहेतुः तर्हि परमाणोर्नित्यत्वात् समवायिकारणनाशस्यापि नाशहेतोरनुपपत्तेर्विनाशकारणरहितत्वेन गगनवद् द्व्यणुके नित्यत्वापत्तिरित्यर्थः । त्रसरेणुरत्र क्षयमिति । अत्र नश्यतीति शेषः । तत्कार्यमिति । अत्रापि नश्य-

तीति शेषः । अन्यथेति । द्व्यणुकादिनाशेऽपि त्र्यणुकाद्यवस्था न इत्यर्थः । तदवयवेति । ये नष्टा विद्यन्ते च ते तावच्छब्देन उक्ताः[पृ.१८९.]। संवृतपटवदिति । घटिकापन्नपटवदित्यर्थः । घटादेः परिमाणसंकोचो नाम किं पटवद्घटावयवानां प्रत्यावृत्य परस्परसंयोगः किं वा न्यूनपरिमाणम् ? प्रथमं विकल्पं दूषयति—स हि न तावदवयवानां संयोगविशेष इति । परिमाणविशेष इति । न्यूनं परिमाणमित्यर्थः । सत्येव पूर्वस्मिन्नधिके परिमाणेति । तस्मिन्नेव घटादौ न्यूनपरिमाणोदय इति पक्षं दूषयति—नाद्य इति । भिन्नपरिमाणस्येति । न्यूनाधिकपरिमाणस्येत्यर्थः । पूर्वस्मिन्नधिकपरिमाणे नष्टे तस्मिन्नेव घटादौ न्यूनपरिमाणोदय इति द्वितीयं पक्षं दूषयति—न विनाश इति । यावद्द्रव्यभावित्वादिति । सति द्रव्येऽविनाशनियमादित्यर्थः । हेत्वन्तरमाह—आश्रयेति । आश्रयावयवेति । परिमाणाश्रयस्य घटादेरवयवाः त्रसरेण्वादयस्तेषां विश्लेषः संयोगविनाशः । यद्वा, तेषामेव विनाशो घटगतपरिमाणनाशकोऽस्तु । तदसिद्धमाश्रयविनाशविनाश्यत्वं परिमाणस्येत्यर्थः । समाधत्ते—अवयवेति । अन्वयव्यतिरेकाभ्यां हि कारणत्वावगमः । अवयवसंयोगविनाशाऽवयवविनाशयोश्चावयविनाशेनान्वयव्यतिरेकावन्यथासिद्धौ तद्गतपरिमाणनाशेन तु तद्द्वारेणैवान्यथासिद्धौ, अतो यद्यवयविनाशे तयोरकारणत्वं तर्हि परिमाणनाशे तयोः कारणशङ्काऽपि नास्तीत्यर्थः । नष्टे द्व्यणुक इत्यादि द्व्यणुकनाशोत्तरक्षणे श्यामादीनां विनाशः परमाणुगतश्यामादिविनाशे द्व्यणुकनाशस्य कारणत्वात् । श्यामादिविनाशोत्तरक्षणे रक्तादीनामुत्पादः परमाणुगतरक्ताद्युत्पादे श्यामादिवि-

नाशस्य कारणत्वात् । रक्ताद्युत्पादोत्तरक्षणे परमाणुकर्मोत्पत्तिः कर्मोत्पत्तौ स्पर्शस्य कारणत्वात् । व्युत्पादितं चैतद्यथावसरम् । शेषं सुगमम् ।

ननु द्व्यणुकादिविनाशादिभ्यः श्यामादिनिवृत्तिसमय एव परमाणोराकाशादिना विभागः परमाणुद्वयविभागेन द्व्यणुकविनाशविशिष्टं कालमपेक्ष्य परमाण्वाकाशविभागारम्भात् । तेन रक्ताद्युत्पत्तिक्षण एव विभागात् परमाणोः पूर्वाकाशदेशसंयोगनिवृत्तिः, रक्ताद्युत्पादनानन्तरक्षण एवोत्तरसंयोगः । न चोत्तरसंयोगक्षणे द्रव्यारम्भकक्रियान्तरं सम्भवति, कर्मवति कर्मानुदयात् । तेनोत्तरसंयोगानन्तरक्षणे द्रव्यारम्भककर्मेति दशक्षणप्राप्तौ कथं नवक्षणेत्यत आह—सेयमिति (पृ.१९०) । सेयं प्रक्रिया तदा यदा इति पक्ष इत्यन्वयः । यदा द्व्यणुकारम्भकसंयोगनाशमपेक्ष्य परमाणुद्वयविभागेन द्व्यणुकनाशक्षणे परमाण्वाकाशादिविभागो जन्यते तदेयं नवक्षणा प्रक्रियेत्यर्थः । विभागः परमाणुद्वयविभागः विभागजविभागः परमाण्वाकाशविभागः कर्म आद्यविभागोत्तरसंयोगहेतुक्रिया ततो द्रव्यारम्भणाय क्रियेति । तस्मिन्निरर्थे तेन यदैव पूर्वकर्मनिवृत्तिस्तदैव द्रव्यारम्भकं कर्मेत्यवधेयम् । अन्यथा एकादशक्षणापत्तौ दशमे क्षणे इति व्याकोपादिति । उत्तरसंयोगेति । यदा द्व्यणुकविनाशोत्तरक्षणे परमाणुद्वयविभागेन श्यामादिविनाशसमकालं परमाणोः पूर्वाकाशदेशविभागो जन्यते उत्तरक्षणे च परमाणुपूर्वाकाशविभागेन रक्ताद्युत्पत्तिः परमाणोः पूर्वाकाशदेशसंयोगो नश्यति तदा रक्ताद्युत्तरक्षणे पूर्वाकाशसंयोगविनाशसहितेन कर्मणा परमाणोरुत्तरसंयोगस्तेजसा जन्यते इति दशक्षणप्राक्रियासिद्धिरित्यर्थः । द्व्यणुकनाशश्यामादिनिवृत्त्यादयो युगपदेव किं न स्युरि-

सभिप्रायवान् पृच्छति—कथमिति । उत्तरमाह—द्रव्यविनाश इति । यदा त्वेकत्र द्व्यणुकविनाशिकाऽन्यत्र च द्व्यणुकान्तरोत्पादिकेति[पृ.१९१]उदाहरणमात्रम् । यदा च यैव पूर्वद्व्यणुकविनाशिका सैव च परमाण्वन्तरेण द्रव्यारम्भकसंयोगजनिका तदा यदि द्रव्यारम्भकसंयोगनिवृत्तिर्विभागस्य विभागजनकापेक्षणीया तर्हि द्व्यणुकविनाशमारभ्य पञ्चमे रूपाद्युत्पत्तेः । यदि तु द्रव्यविनाश एव विभागस्य विभागजनने अपेक्षणीयस्तर्हि द्व्यणुकविनाशमारभ्य षष्ठे क्षणे रूपाद्युत्पत्तिरित्यपि द्रष्टव्यम् । द्वित्रिचतुःक्षणेति । यदा परमाणुकर्मणा परमाण्वोर्विभागः तदैव परमाण्वन्तरे कर्म यदा च परमाण्वोर्द्व्यणुकोपाधिकसंयोगविनाशःतदैव परमाण्वन्तरस्य पूर्वदेशविभागः तत एकत्र क्रमेण द्व्यणुकनाशश्यामादिरक्ताद्युत्पादा अन्यत्र च पूर्वसंयोगनाशोत्तरसंयोगद्व्यणुकोत्पादाः चतुर्थे क्षणे गुणोत्पत्तिरिति चतुःक्षणा प्रक्रिया वक्तव्या, सा च न युक्ता । द्व्यणुकविनाशद्वितीये क्षणे श्यामादीनां विनाशात् रक्तानुत्पादात् परमाणौ रूपरसस्पर्शरहितत्वेन द्व्यणुकनाशतस्तृतीये क्षणे द्व्यणुकान्तरानारम्भकत्वात्स्पर्शादिरहितस्य चानारम्भकत्वं समवायिकारणस्पर्शस्यान्वयव्यतिरेकाभ्यां द्रव्यजनकत्वात् । अन्यथा मनोभ्यां द्रव्यारम्भापत्तेरिति, तदिदमाह—सगुणेनैवेति । रूपस्पर्शादिमतेत्यर्थः । क्रियाविभागादिन्यायेनैकत्र क्रमेण द्व्यणुकनाशश्यामादिनाशौ परमाण्वन्तरे चोत्तरसंयोगद्व्यणुकोत्पादौ तृतीयक्षणे गुणोत्पत्तिरिति त्रिक्षणा प्रक्रिया वक्तव्या, सापि न । द्व्यणुकोत्पत्तिक्षणे श्यामादीनां विनाशात् रक्तादीनां चानुत्पादात् । परमाणौ रूपादिरहितत्वेन तदुत्तरक्षणे द्व्यणुके रूपाद्युत्पत्तेर्दुर्घटत्वा-

दिति, तदिदमाह—सगुणेनेति । कार्योत्पत्तिक्षणे रूपादिगुणवतेत्यर्थः । अन्यथा द्वितीयक्षणे कार्ये गुणानुपपत्तिरिति भावः । क्रियाविभागादिन्यायेन द्व्यणुकविनाशक्षणे परमाण्वन्तरक्रियादिना द्व्यणुकान्तरोत्पत्तिः द्वितीयक्षणे गुणोत्पत्तिरिति द्विक्षणा प्रक्रिया वक्तव्या । सापि न, द्व्यणुकोत्पत्तिक्षणे परमाणुगतश्यामादीनां विनश्यदवस्थेन द्वितीयक्षणे गुणोत्पत्तेरसंभवात्, विनश्यदवस्थस्यासमवायिकारणत्वानङ्गीकारात् । तदिदमाह—सगुणेनेति । कार्योत्पत्तिक्षणेऽविनश्यदवस्थरूपादिगुणवतेत्यर्थः । अन्यथा द्वितीयक्षणे गुणोत्पत्तेर्दुर्घटत्वादिति भावः । द्व्यणुकान्तरेऽपि प्राचीनश्यामादीनामेव रूपाद्यारम्भकत्वे रक्तादुत्पत्तिर्दुर्घटा, सा च विवक्षिता पक्वाभ्यामेव परमाणुभ्यां द्व्यणुकारम्भस्य वर्तमानत्वात् । पक्वापक्वाभ्यां पुनरारम्भं चैव वक्ष्यति । एवमेवेति । पाकजोत्पत्तिव्युत्पादनस्य प्रयोजनवत्तामुपसंहरति—तदेवमिति । सेयं पाकजोत्पत्तौ ऋजुमार्गेण ग्रन्थव्याख्या, तर्कप्रमाणचिन्ता तु प्रत्येकग्रन्थगोचरा पौर्वापर्यानुसन्धातृमनुष्याणां न दुर्लभा ।

विषयतया हेतुरिति । विशेषणतया हेतुरित्यर्थः । यो ह्येकादिसंप्रतिपन्नपदार्थव्यतिरिक्तसंख्यायां न प्रमाणमित्याह तस्य किमेकादिज्ञानं निर्विषयमिष्टम्, अत्यन्तासदेकादिविषयं वा, संप्रतिपन्नघटादिप्रमा वा, घटाद्यारोपो वा? आद्यं निराचष्टे—न ह्येकादीति । व्याघातादिति । एकादिविषयज्ञानमेकादिज्ञानं, तेन एकादिविषयं ज्ञानं निर्विषयं चेति व्याहतमित्यर्थः । नापि द्वितीय इत्याह—नाप्यलीकेति । अलीकत्वमत्यन्तासत्त्वं, तच्च बाधकगम्यमबाधितेऽङ्गीक्रियमाणम् । अभ्यु-

पमप्रविरोधं सौगतानामापादयतीति तात्पर्यम् । तृतीये दूषणमाह—नापीत्यादिना पटेऽपि भावादित्यन्तेन । पटेऽपि भावादित्यस्यानन्तरं 'नापि रूपादिनिबन्धनं परैरेवानङ्गीकारात्' इति पूरणीयम् । घटादिस्वरूपं निबन्धनं विशेषणत्वेन विषयोऽस्य तद् घटस्वरूपनिबन्धनम् । 'घटान्तरे भावात्' इत्येकं दूषणम् । अपिशब्दात्तस्यैव तद्विशेषणत्वानुपपत्तिरित्यपरम् । तत्र प्रथममनुपपन्नमेव । तथाहि—अयमेको घट इति ज्ञानं नैतद्घटनिबन्धनमिति प्रयोगे व्याघातादासिद्धेश्च । न खेतदेव घटान्तरविषयम् । घटान्तरे जायमानमेको घट इति ज्ञानं नैतद्घटविषयमिति साधने सिद्धसाधनत्वात् एतद्घटान्तरादिविशिष्टकालादिग्राहकयोगिज्ञानादिना व्यभिचाराच्च । तस्मादेको घट इत्येतद्घटविशेषणमेकस्माच्छिन्नम् एतद्विशेषणत्वात्संप्रतिपन्नवदित्यनुमानम् । एको घट इति विशेषणविशेष्यभेदग्राहकं प्रत्यक्षं च घटसंख्ययोर्भेदे प्रमाणमित्येवात्र न्यायः । 'नापि घटत्वनिबन्धनं पटेऽपि भावात्' इत्यपि प्राचीननयनिरस्तम् । पटेऽपीत्यपिशब्दसमुच्चितमेव घटत्वैकत्वयोर्भेदबोधकं वक्तव्यं, तच्च घटत्वमेकत्वाच्छिद्यते अनेकाश्रितत्वात्पटवदित्यादि । एतेन द्रव्यत्वमेवैकत्वमित्याद्यपि निरस्तम् । चतुर्थं सोपपत्तिकमाशङ्क्य निराचष्टे—न चाऽरजतेऽपीति । अभ्रान्तत्वादिति । अबाधितत्वादित्यर्थः । यथाश्रुतस्य साध्यविशिष्टत्वात् । एवमेकादिज्ञानस्य घटाद्यविषयत्वे सति प्रमात्वं प्रसाध्य घटादिव्यतिरिक्तविषयत्वे प्रयोगमाह—सोऽयं घटादाविति । स च यथाश्रुतोऽनुपपन्न एव घटत्वव्यतिरिक्तविषयत्वसाधने घटावयवघटनिष्ठधर्मैरर्थान्तरत्वात् । घटघटत्वाद्यतिरिक्तविषयत्वे तु साध्यघटादिशब्देन संख्याव्यतिरिक्तसक-

लवस्तुपरिग्रहः, तदाऽप्रसिद्धविशेषणत्वम् । अथ घटतदवयवतद्धर्मसंप्रतिपन्नघटधर्मतद्धर्मादिपरिग्रहः, तथापि संख्यानिष्ठधर्मैरर्थान्तरम् । तद्धर्ममात्रपरिग्राहकत्वेनैवास्य साध्यस्य चरितार्थत्वे संख्याग्राहकत्वस्यासिद्धेः । किं चैको घट इति प्रत्ययस्य धर्मित्वे 'पटादावपि जायमानत्वात्' इत्यसिद्धो हेतुः । 'एकः पटः' इत्यादिप्रत्ययस्य धर्मित्वे घटघटत्वादिव्यतिरिक्तपटादेर्ग्राहकत्वेन सिद्धसाधनं, बहुदोषग्रस्तं चैतत् । तस्माद्घटघटत्वादिशब्दः संप्रतिपन्नैतत्प्रत्ययविषयोपलक्षकः, हेतुश्च प्रत्ययत्वोपलक्षकः । तेनैको घट इति प्रत्ययः संप्रतिपन्नैतद्विषयातिरिक्तजातिमत्प्रमा प्रमात्वात् घटप्रमावदिति प्रयोगः कर्तव्यः । न च संख्याधर्मिभिरर्थान्तरता, संख्याधर्मस्य जातेरभावस्य वा जातिमत्पदेनैव व्यवच्छिन्नत्वात् तद्विषयव्यतिरिक्तप्रमात्वसिद्धेर्दुर्वारत्वादिति । भवतु प्रमा, मा वा भूत्, संप्रतिपन्नैतद्विषयातिरिक्तजातिमत्प्रमात्वाभावशङ्कावादिनः किं प्रमात्वेऽपि संप्रतिपन्नैतद्विषयातिरिक्तजातिमद्विषयत्वाभावो विवक्षितः किं वा संप्रतिपन्नैतद्विषयाऽतिरिक्तजातिमद्विषयत्वेऽप्यारोपोऽयमिति विवक्षितम् ? प्रथमं दूषयति—नहि तद्व्यतिरेकेणेति । तद्व्यतिरेकेण भवतीति प्रत्ययत्वोपलक्षकम् । तद्विषयश्चेति संप्रतिपन्नैतद्विषयातिरिक्तजातिमद्विषयत्वाभावोपलक्षकम् । तेन प्रमात्वसंप्रतिपन्नैतद्विषयातिरिक्तजातिमत्प्रमात्वाभावयोः शीतोष्णस्पर्शयोरिव परस्परपरिहारेणैव निर्णीतत्वादेकत्वाङ्गीकारे व्याहतिरित्यर्थः । द्वितीयं दूषयति—न हीति । तत्प्रत्ययनिमित्तमन्तरेणेति । एकादिप्रत्ययनिमित्ततयाऽङ्गीकृतघटादिकमन्तरेण पटादौ भवतीतिवदतोऽयमारोप इति विवक्षितम् । तेनारोपो भ्रान्तश्चेति एको व्या-

घातः, दोषजन्योऽभ्रमश्चेति द्वितीय इति विवक्षितं, न त्वाकस्मिकत्वं नाम किञ्चिदापाद्यं प्रमितं तद्व्याप्यं वा किञ्चिदापाद्यमिति; येन यथाश्रुतस्तर्कोऽवकाशमासादयेदिति । एकादिप्रत्ययस्य घटपटसाधारणत्वादित्यादि प्रागेव दूषितम् । न हि य एव घटे एकप्रत्ययः स एव पटे इति केनचिदभ्युपगतम् । केचिद् घटपटसाधारणत्वादिति घटपटसाधारणवस्तुग्राहकत्वादिति व्याख्याय एकत्वं घटाद्भिद्यते घटपटसाधारणत्वादिति प्रयुञ्जते, तदसत् । घटाद्येकत्वस्य घटाद्येकैकनिष्ठत्वेन साधारणत्वस्यासिद्धेः । एको घट एकः पट इत्यनुगतप्रत्ययबलेनानुगतं वस्तु प्रसाध्य तद् घटादेर्भिद्यत इति साधनेऽप्यर्थान्तरम् । एकत्वादेर्घटादिभेदसिद्धेः । [पृ.१९३] एवं स्वरूपभेद इति । परस्परभिद्यमानो घटादिरित्यर्थः । तदा त्र्यादिष्वपीति । त्र्यादिप्रत्ययेष्वपीत्यर्थः । द्वित्वप्रत्ययः स्यादिति । द्वित्वप्रत्ययः स्यादित्यर्थः । तदनेन यदि परस्य भिद्यमानघटादिकमेव द्वित्वं तर्हि परस्परभिद्यमानपटादिप्रत्ययत्वमेव द्वित्वप्रत्ययत्वमिति त्रयो घटा इत्यादिप्रत्ययेऽपि परस्परभिद्यमानघटादिविषये द्वित्वप्रत्ययत्वमनभ्युपगम्यमानमभ्युपगमविरोधमापादयतीति दर्शितम् । यथाश्रुतस्तु तर्कोऽनुपपन्न एव । न हि परस्परभिद्यमानघटादेर्द्वित्वात्मकता त्र्यादिष्वपि द्वित्वप्रत्ययविषयत्वेन व्याप्ता, येनेदमापादयेत् । न च त्र्यादिष्वपि द्विप्रत्ययः परस्यानिष्टः, यथाभूते त्रिप्रत्ययस्तथाभूते द्वित्वप्रत्ययप्रसङ्ग इत्यादि तु निरर्थकम् । घटपटादावेव वा स्वरूपभेद इत्यपि न युक्तम् । अत्र किं घटादौ यो द्वित्वप्रत्ययः स पटादौ न स्यादिति विवक्षितं किं वा यदि घटादौ स्वरूपभेदो द्वित्वं तर्हि द्विप्रत्ययः पटादौ न स्यादिति ? आद्ये इष्टापादनविपर्ययपर्यव-

साने । द्वितीये मूलशैथिल्यम् । न हि घटादिस्वरूपभेदस्य द्वित्वात्मत्वादि पटादौ "द्वौ पटौ" इत्यादिप्रत्ययाविषयत्वेन व्याप्तम् । तस्माद् घटद्वित्वं घटाद् भिद्यते द्वित्वात्मत्वात् पटद्वित्ववदित्यादिकमेव ज्यायः ।

तदेवमुक्तप्रकारेणैकत्वादिसाक्षात्कारो घटादिव्यतिरिक्तजातिमत्प्रमात्वेन साधितः । तत्साधकमेवानुमानं वा संख्यायां प्रमाणमित्येवंपरत्वेन "एकादिव्यवहारहेतुः संख्या" इति भाष्यं व्याख्याय तर्कपरतया व्याचष्टे—अथ वेति । यदि संख्येति । घटादभिन्नत्वं घटनिश्चयदशायामसंदिग्धत्वेन व्याप्तं घटे दृष्टम् । तेन यदि संख्यैतद्घटस्वरूपमेव तर्ह्येतद्घटनिश्चयदशायां नैतद्घटनिश्चयवतः संदेहविषयः स्यादिति । तर्कविपर्ययस्तु इयं संख्या एतस्माद्भिद्यते मदीयैतन्निश्चयदशायां मन्निष्ठसंदेहविषयत्वात्पदार्थान्तरत्वादिति । एवमन्यदपि यथाकथञ्चिदाचार्यश्रद्धया समर्थनीयम् । असमुच्चयशब्देन यदि घटादिनिष्ठो धर्मविशेषो विवक्षितस्तदा विवाद इत्याह—एकत्वस्यैवेति । अथ समुच्चयशब्देन भिन्नविषयिण्येका बुद्धिरुक्ता, तत्राप्याह—भिन्नानामिति ।

क्वचित्तात्त्विकीमिति । द्वित्वादिप्रागभावरूपप्रतिनियतसहकारिबलादपेक्षाबुद्धिः प्रतिनियतं द्वित्वादिकमुत्पादयति । तेन तात्त्विकीमभावप्रतियोगित्वेन संख्यामुपादाय द्वित्वादेरुत्पादनियमः, भाक्तीं संख्यामादाय रूपादौ चतुर्विंशतिरेवेत्यादिनियम इत्यर्थः । [पृ.१९४]लाघवायेति । यस्य द्वित्वादिकं गुणः, तेन द्वित्वव्यक्तीनां व्यावृत्तत्वात् "द्वौ द्वौ" इत्यनुगतव्यवहारसिद्धये तास्वनुगतं सामान्यान्तरं कल्पनीयम् । द्वित्वं सामान्यमिति त्वेतदतिरिक्तं न किञ्चिदपि कल्पनीयमिति

लाघवम् । एकत्वद्वित्वादयः परस्परव्यक्तिपरिहारवन्तो न वा ? आद्ये जातित्वं न घटत इत्याह—न विरोधादिति । परस्परपरिहारवतोरेकत्र समावेशो न युक्त इत्यर्थः । द्वितीयेऽपि किंन्यूनाधिकव्यक्तिवृत्तयस्तुल्यव्यक्तिवृत्तयो वा? नाद्य इत्याह—परस्परभावाभावाच्चेति । द्वितीये दूषणमाह—अन्यूनानतिरिक्तेति । विरुद्धधर्माध्यासो हि तदिति । अत्र न चासावन्यूनानतिरिक्तव्यक्तिवृत्तित्वे संभवतीति शेषः । जातेर्हि व्यक्तिविशेष एव जात्यन्तराद्व्यावर्तको धर्मः, समवेतधर्मान्तराभावात्; न चासौ तुल्यव्यक्तित्वे सम्भवतीति भावः । ननु मा भूद्विरुद्धधर्माध्यासो भेदप्रमाणं, द्वे त्रीणीत्यादिलक्षणप्रत्ययास्तु भविष्यन्तीति शङ्कते—प्रत्ययवैलक्षण्यमिति । समाधत्ते—न धर्मविरोधमिति । विलक्षणप्रत्ययो हि व्यावृत्तप्रत्ययः, स च व्यावर्तकधर्मजन्यः । न च जातित्वपक्षे द्वित्वादौ समवेतो व्यावर्तकधर्मः सम्भवति, जातौ तदनङ्गीकारात् । नापि व्यक्तिविशेषो व्यावर्तकः, तुल्यव्यक्तित्वात् । तज्जातित्वपक्षे द्वित्वैकत्वादौ व्यावर्तकधर्मानुपपत्तेः व्यावृत्तप्रत्यय एव दुर्घट इति कथं भेदे प्रमाणं स्यादिति । अस्ति तावद्व्यावृत्तप्रत्यय इति चेत् । सत्यम्, अत एव व्यावर्तको धर्मः स्वीकरणीयः । स च व्यक्तिविशेषलक्षणो न घटत इति द्वित्वादिसमवेतोऽङ्गीकरणीयः । न च जातौ धर्मो घटत इति द्वित्वादेरजातित्वसिद्धिरिति । अन्यथेति । अन्यूनानतिरिक्तव्यक्तिवृत्तिजातिद्वयपक्ष इत्यर्थः । घटत्वकलशत्वादेरापत्तौ घटकलशबुद्ध्योः शब्दयोश्च पौनरुक्त्यं न स्यादित्यर्थः ।

गणितव्यवहारहेतुरिति । गणितव्यवहारविषय इत्यर्थः । तेन नेश्वरज्ञानादिनाऽतिव्याप्तिः । कारणगुणपूर्वकं द्वित्वं न

त्वपेक्षाबुद्धिजन्यमिति पक्षे ऽयमेकोऽयमेक इति बुद्धिं विना द्वित्वोपलब्धिः स्यादत आह–[पृ.१९५]अपेक्षाबुद्ध्येति । एकद्रव्यं प्रसज्येतेति । अत्र कारणगुणानामेकपर्यवसितहेतुत्वावधारणादिति शेषः । युक्त्यन्तरमाह–त्रित्वादिकं चेति । यदि द्व्यणुकगते द्वित्वे परमाणुगतमेकत्वद्वयं जनकं तर्हि तावन्मात्रस्य द्वित्वात्मक एव कार्ये क्लृप्तशक्तित्वात् त्रित्वोत्पत्त्यर्थमेकत्वान्तरमादरणीयं,न च तत्परमाणुद्वये सम्भवतीति द्व्यणुके त्रित्वं न जायेतेत्यर्थः।(पृ.१९६)तद्वदेवेति । कारणाकारणगुणासमवायिकारणके अकारणमेव समवायिकारणतयात्क्लृप्तम् । तेन संयोगवत्संख्या न कारणमाश्रयेदित्यर्थः । ननु यान्येव परमाण्वेकत्वानि द्व्यणुकगतैकत्वजनकानि तान्येव कारणगुणपूर्वत्वपक्षे द्व्यणुकादौ द्वित्वाद्यारम्भकारणानीति नासमवायिकारणभेदः तथाप्येकत्वे द्व्यणुकमेव समवायिकारणं द्वित्वादौ परमाणवोऽपीति समवायिकारणभेदादेकत्वद्वित्वादेर्भेदो भविष्यतीति शङ्कते—कार्यमपेक्ष्येति । कार्येति । एकत्वसमवायिकारणद्व्यणुकमपि तावत् द्वित्वस्य समवायिकारणं, तेन यद्यपि द्वित्वे समवायिकारणान्तरमस्ति तथाप्येकत्वहेतूनां सर्वेषामपि द्वित्वे सत्त्वात् द्वित्वमेकत्वात्मकं स्यादित्यर्थः । एकत्वद्वित्वप्रागभावावेकत्वद्वित्वयोर्व्यावृत्तौ हेतू भवतामिवास्माकमपीत्यनाशङ्कनीयमेव । कारणगुणपूर्वकार्यवैषम्ये प्रागभावातिरिक्तहेतुवैषम्यस्यैव अन्वयव्यतिरेकाभ्यामुपयोगावधारणात् । अकारणगुणपूर्वकस्यापि शब्दादेः प्रागभावादिहेतुव्यतिरिक्तहेतुत्वावधारणात् । भवत्पक्षे द्वित्वादौ का गतिरिति चेत् । न, पाकजादिभिर्व्यभिचारात् । अपेक्षणीयान्तराभावादिति । अत्रास्माकं तु लिङ्गजाऽपेक्षाबुद्धिरपेक्षीकरणेति न द्वित्वादेः

सततोत्पत्तिः, नाप्यविनाशप्रसङ्गः अपेक्षाबुद्धेर्नाशस्यैव नाशकत्वादित्यभिसंहितम् । द्वित्वद्विपृथक्त्वादेश्चेति । प्रतिनियततत्तद्व्यवस्थापकव्यङ्ग्यद्रव्यत्वघटत्वव्यवच्छेदार्थं समानदेशत्वग्रहणम् । द्रव्यत्वघटत्वादेर्न्यूनाधिकव्यक्तितया समानदेशत्वाभावात् । समानदेशत्वे सति समानेन्द्रियग्राह्ययोरपि शुक्लकृष्णयोर्मन्दालोकप्रतिनियतव्यङ्ग्यकव्यङ्ग्यत्वमास्थेयम् । अन्यथा मन्दान्धकारेऽपि शुक्लोपलम्भेऽपि कृष्णरूपानुपलम्भानुपपत्तेः । ततः समानधर्मत्वे सतीति विशेषणान्तरमुपादेयमिति चेत् । न, शुक्लकृष्णयो रूपयोर्भिन्नद्रव्यवर्तितया समानदेशत्वस्यैवाभावात् । प्रतिनियतचक्षुरादिव्यङ्ग्यरूपरसादिव्यवच्छेदार्थं समानेन्द्रियग्राह्यपदम् । रूपसंख्यापरिमाणादयश्चात्रोदाहरणम् । उपाधिविरहाच्च व्याप्तिसिद्धिरित्याद्यनुसन्धेयम् । नियामिका चेति । द्वित्वादेः प्रतिपुरुषेवद्यत्वनियमनिर्वाहिकेत्यर्थः ।

तदेतदिति । अपेक्षाबुद्धेरुत्पादकत्वं तद्विनाशस्य च विनाशकत्वमित्यर्थः । तदेतद् विशदयति इत्यन्वयः । बुद्धिमात्र इति । एकत्वविषये बुद्धिमात्र इत्यर्थः । न्यायप्राप्तामिति । उक्तो न्यायः । शिष्यजिज्ञासामनूद्येति । जिज्ञासाविष्करणं प्रश्नः । तेन प्रश्नपूर्वमित्यर्थः । इदं च 'कथम्' इत्यारभ्य 'एतेन त्रित्वाद्युत्पत्तिर्व्याख्याता' इत्यन्तस्य भाष्यस्यावतारणम् । यदा बुद्धिरुत्पद्यते तदा द्वित्वमारभ्यत इति न युक्तम् । कार्यकारणयोः पौर्वापर्यनियमादित्याशङ्क्योत्पद्यत इत्यन्यथा व्याचष्टे—(पृ० १९७) उत्पन्ना भवतीति । अस्यैव विवरणं 'द्वित्वारम्भाय व्याप्रियते' इत्यादि । अपेक्षाबुद्धेर्द्वित्वोत्पत्तिमभिधाय तद्विनाशाद् द्वित्वविनाशो वक्तव्यः, प्रस्तुतत्वात् । द्वे द्रव्ये इति ज्ञानव्युत्पादनं त्वप्रस्तुतत्वादयुक्तम् इति शङ्कां

परिहरन्नुक्तभाष्यमवतारयति–द्वित्वस्येति । द्वित्वसामान्यज्ञानादपेक्षाबुद्धेर्विनश्यत्तेति हेतोः पञ्चमी न युक्ता । अपेक्षाबुद्धिविनश्यत्तायां द्वित्वसामान्यज्ञानादव्यतिरिक्तत्वेन द्वित्वसामान्यज्ञानस्य तत्र हेतुत्वानुपपत्तेरित्याशङ्क्य परिहरति–(पृ०१९८)यद्यपि सामान्यज्ञानमेवेति तस्य हेतुत्वमाविष्कर्तुमिति । द्वित्वसामान्यज्ञानस्य विनश्यत्ताविशेषणीभूतं विनाशं हेतुत्वमाविष्कर्तुमित्यर्थः।[पृ०२००]द्रव्यज्ञानेऽनुव्यवसाय इति । द्वे द्रव्ये जानामीति ज्ञानविषयज्ञानमपेक्षाबुद्धिरिति द्वित्वोत्पादकत्वानुत्पादकत्वाभ्यां विप्रतिपन्ना बुद्धिर्विवक्षिता । तेन त्रित्वादिजनकापेक्षाबुद्धीनां धर्मित्वेनानुपादानादंशे द्वित्वजनकत्वं बाधितमिति निरस्तम् । तेनानुविधीयमानत्वादिति । नियमेन द्वित्वपूर्वक्षणवर्तित्वादित्यर्थः । ननु यावदाश्रयभावि द्वित्वम्, अपेक्षाबुद्धिस्तु द्वित्वोत्पत्त्यनन्तरमुत्पन्ना द्वित्वव्यञ्जिका,तेन द्वित्वपूर्वक्षणवर्तित्वमपेक्षाबुद्धेरसिद्धमित्याशङ्क्योक्तं–व्यञ्जकत्वानुपपत्ताविति । अपेक्षाबुद्धेर्व्यञ्जकत्वे पूर्वमेव निषिद्धे अपेक्षाबुद्धिद्वितीयक्षणात् पूर्वं सत्यप्याश्रये योग्यानुपलब्धिसहितप्रत्यक्षेण द्वित्वाभावनिर्णयादपेक्षाबुद्धेर्द्वित्वपूर्वक्षणवर्तित्वासिद्धिरिति भावः । ये तु व्यञ्जकत्वानुपपत्ताविति हेतुविशेषणमाहुः, तेषां व्यर्थविशेषणत्वम् । अथ तेनानुविधीयमानत्वादिति नियमेन द्वित्वोपलब्धिपूर्वक्षणवर्तित्वादिति विवक्षितं, तेनाऽऽत्ममनःसंनिकर्षादिना व्यभिचारपरिहारार्थं व्यञ्जकत्वानुपपत्ताविति विशेषणमित्युच्यते, तदप्यसत् । उपलब्धिपदार्थव्यञ्जकत्वानुपपत्तिपदार्थयोः समुदितयोर्वैयर्थ्यात् नियमेन द्वित्वपूर्वक्षणवर्तित्वस्य व्यभिचाराभावादिति । शब्दं प्रति संयोगविभागवदिति । अत्र शब्दं प्रतीति व्यर्थं संयोगविभागवदिति वैकल्पिकं वैधर्म्यदृष्टान्तद्वयं,

साधर्म्यदृष्टान्तत्वे साध्यसाधनविकलत्वात्, संयोगाविभागयोर्द्वित्वाजनकत्वात् नियमेन द्वित्वपूर्वक्षणवर्तित्वरहितत्वाच्च। साधर्म्यदृष्टान्तस्तु द्वित्वजनको घटादिर्द्रष्टव्य इति। नन्वस्तु पूर्वोत्तरकर्मविषयाणां बुद्धीनां विषयभेदाद्भेदः, अस्तु च स्थिरविषयबुद्धीनां निमेषोन्मेषसन्ततौ भेदः, निमेषदशायां 'न पश्यामि' उन्मेषदशायां च 'पश्यामि' इति प्रतीतेः। यत्र तून्मिषितं चक्षुरेव घटादिकं स्थिरमुपलभते तत्र कथमाशुतरविनाशोत्पादित्वं बुद्धेरत आह—तथाचेति। स्थिराविषया इति। अत्रोन्मीलितचक्षुषोऽपीति शेषः। सन्तानवर्तिन्य इति। आशुतरविनाशिन्य इति विवक्षितं न त्वव्यवहितपूर्वोत्तरभावेन जायन्ते इति, एकयैव व्यवधाननिवर्तनीयया व्यभिचारात्। व्यवधाननिवर्तनीयत्वादिति (पृ. २०१)। यथाश्रुतं न युक्तम्। बुद्धेर्बुद्ध्यन्तरविनाश्यत्वपक्षे व्यवधानस्याविनाशकत्वात्। व्यवधानादिन्द्रियसन्निकर्षनाशः, ततो बुद्धिविनाश इति परम्परया व्यवधानस्य बुद्धिनिवर्तकत्वमित्यपि न बुद्धेर्बुद्धिविनाश्यत्वपक्षे इन्द्रियसंनिकर्षनाशानाश्यत्वात् प्रदीपप्रभारम्भकसंयोगनाशाश्रयनाशनिवर्तनीया न व्यवधाननिवर्तनीयेति साधनविकलो दृष्टान्तः। न चाकारश्लेषेणाव्यवधाननिवर्तनीयत्वादिति हेतुवर्णनं युक्तम्। अव्यवधाननिवर्तनीयत्वं यथाश्रुतमविनाश्यत्वं तदा साध्यविशिष्टता, अन्यथाऽन्यत्तदाऽशक्यानिर्वचनं क्लिष्टं चेति। तस्माद् बुद्धित्वात् विद्युद्बुद्धिवदिति हेतुदृष्टान्तौ लक्षणया वर्णनीयौ। ननु यथा प्रथममपेक्षाबुद्धेर्द्वित्वजनकत्वमेवं द्वित्वोत्पत्त्यनन्तरं द्वित्वव्यञ्जकत्वम्। तेन व्यञ्जकाभावादपि द्वित्वानुपलब्धिर्घटमाना न संख्याश्रये द्वित्वाभावसाधिकेति कथमाशुतरविनाश्यत्वं द्वित्वस्येत्यत आह—अभिव्यञ्जकत्व इ-

ति । द्वित्वमिति । घटपटयोः सतोरेव निवर्तमानं घटपटद्वित्वमित्यर्थः । तेन घटपटविनाशविनाश्यद्वित्वस्य धर्मित्वेनानुपादानादंशे निमित्तविनाशविनाश्यत्वं बाधितमिति निरस्तम् । निमित्तविनाशविनाश्यमिति । एतद्घटपटद्वित्वजनकापेक्षाबुद्धिविनाशविनाश्यमिति विवक्षितम् । तेन द्वित्वजनकादृष्टविनाशविनाश्यत्वेनार्थान्तरमिति निरस्तम् । आश्रयेति । प्रकृतद्वित्वाश्रयौ घटपटौ विवक्षितौ । विरोधिगुणेति । घटपटगुणौ विवक्षितौ । गुणस्य सत इति । घटपटगुणस्य सत इति विवक्षितम् । विनाशित्वादिति । अत्र न विनाशी अविनाशीति विग्रहगतविनाशिपदेन विनाशिविशेषावनेकपृथक्त्वबहुत्वसंख्ये विवक्षिते । तेनात्राविनाशित्वमनेकपृथक्त्वबहुत्वातिरिक्तत्वमभिप्रेतम् । तस्माद् घटविनाशाविनाश्यपटविनाशाविनाश्यघटगुणाविनाश्यपटगुणाविनाश्यानेकपृथक्त्वबहुत्वातिरिक्तघटपटगुणत्वादिति हेत्वर्थः । अत्र च घटविनाशविनाश्यघटपटसंयोगादिनिवृत्त्यर्थं घटविनाशाविनाश्यग्रहणम् । पटाविनाशाविनाश्यघटपटसंयोगादिनिवृत्त्यर्थं पटाविनाशाविनाश्यग्रहणम् । घटोत्तरदेशसंयोगविनाश्यघटपटविभागनिवृत्त्यर्थं घटगुणाविनाश्यग्रहणम् । पटोत्तरदेशसंयोगविनाश्यघटपटविभागनिवृत्त्यर्थं पटगुणाविनाश्यग्रहणम् । अनेकपृथक्त्वबहुत्वनिवृत्त्यर्थमनेकपृथक्त्वबहुत्वव्यतिरिक्तग्रहणम् । घटाकाशादिद्वित्वनिवृत्त्यर्थं पटग्रहणम् । पटाकाशादिनिवृत्त्यर्थं घटग्रहणम् । एषां सर्वेषामपि प्रकृतद्वित्वजनकापेक्षाबुद्धिविनाशाविनाश्यत्वेन विपक्षत्वादिति । एवं च चरमज्ञानवादिति अन्वयदृष्टान्तोऽनुपपन्न एवेति मन्वानः पूर्वत्राऽपरितोषाद् वैधर्म्यदृष्टान्तमाह-व्यतिरेकेणेति । तस्मादेवं प्रयोगः—सतोरेव घटपटयोर्निवर्तमानं घटपट-

द्वित्वमेतज्जनकापेक्षाबुद्धिविनाशविनाश्यं घटविनाशाविनाश्यपट-
विनाशविनाश्यघटगुणाविनाश्यपटगुणाविनाश्यानेकपृथक्त्वव-
हुत्वातिरिक्तघटपटगुणत्वात् न यदेवं न तदेवं, यथा द्व्यणु-
कमित्यादि । न चैतद्द्वित्वजनकापेक्षाबुद्धिविनाशविनाश्याप्रसि-
द्धेरप्रसिद्धविशेषणता । एतद्द्वित्वजनकापेक्षाबुद्धिविनाशः कि-
ञ्चिद्विनाशकत्वातिरिक्तैतद्धर्मत्वरहिताधिकरणं मेयत्वात् घटव-
दिति विशेषणप्रसिद्धेः । यथाश्रुतं तु 'द्वित्वं निमित्तविनाशविना-
श्यमाश्रयविनाशविरोधिगुणप्रादुर्भावाभावे गुणस्य सतो विनाशि-
त्वाच्चरमज्ञानवत्' इत्यनुमानमनुपपन्नमेव । आश्रयविनाशैकवि-
नाश्यद्वित्वांशे बाधाद् द्वित्वजनकादृष्टाविनाशाविनाश्यत्वेनार्थान्त-
रत्वाच्च आश्रयविनाशाभाव इति हेतुविशेषणाऽसिद्धेश्च यत्किञ्चि-
दाश्रयविनाशस्य द्वित्वविनाशपूर्वक्षणे सत्त्वात् । आश्रयविनाश-
विनाश्यत्वाभावो विशेषणत्वेन विवक्षित इति चेत् । न, द्वित्वस्य
गुणत्वाश्रयापेक्षाबुद्धिविनाशविनाश्यत्वेन तस्याप्यसिद्धेः । द्वित्वा-
श्रयविनाशविनाश्यत्वाभावो विशेषणमिति चेत् । न, चरमज्ञा-
नस्य किञ्चिद्द्वित्वाश्रयशरीरविनाशविनाश्यत्वेन तद्रहितत्वा-
नुपपत्तेर्दृष्टान्तस्य साधनविकलत्वात् । घटपटाद्वित्वं पक्षः, त-
दाश्रयघटपटविनाशविनाश्यत्वाभावो हेतुविशेषणमिति चेत् ।
न, घटपटविनाशविनाश्यत्वरहितविरोधिगुणविनाश्यत्वरहितगु-
णत्वे सति विनाशित्वरूपसाधनस्य निमित्तविनाशविनाश्यत्व-
रूपसाध्यरहितेऽपि स्तम्भरूपादौ विद्यमानत्वेनानैकान्तिकत्वात् ।
एवं विरोधिगुणविनाश्यत्वरहितत्वं विशेषणमप्यसिद्धम् । ईश्वर-
ज्ञानादिना विरोधिगुणेन द्वित्वविनाशात् । द्वित्वसमानाश्रयवि-
रोधिगुणविनाश्यत्वरहितत्वं विशेषणमिति चेत् । न, ईश्वरज्ञाना-
देरपीश्वरनिष्ठद्वित्वसमानाश्रयत्वेन विशेषणासिद्धेस्तदवस्थत्वात् ।

घटपटद्वित्वं पक्षः, घटपटद्वित्वसमानाश्रयविरोधिगुणविनाश्यत्वाभावो विशेषणमिति चेत् । न, आश्रयविनाशविनाश्यत्वरहितघटपटद्वित्वसमानाश्रयविरोधिगुणविनाश्यत्वरहितगुणत्वे सति विनाश्यत्वरूपसाधनस्य निमित्तविनाशविनाश्यत्वरूपसाध्यरहितपार्थिवपरमाणुरूपादिनिष्ठत्वेनानैकान्तिकत्वात् । निमित्तविनाशविनाश्यत्वे च साध्ये संख्यात्वाभाव उपाधिः, साध्यव्यावृत्ते सति साधनाव्यावृत्तत्वात् । पक्षतुल्यव्यतिरिक्तस्यैकत्वादेर्व्यावर्त्यस्य सत्त्वात् न पक्षेतरता । द्वित्वं न निमित्तविनाशविनाश्यं संख्यात्वादेकत्ववदिति सत्प्रतिपक्षत्वं च द्रष्टव्यम् । तस्मादस्मदुक्तरीत्यैवेदमनुमानं समर्थनीयम् । एवमन्यान्यप्यनुमानानि ऋजुरीत्या प्रवर्त्तमानानि यथाश्रुतानि दूषणीयानि, वक्ररीत्या च समर्थनीयानि । कथं पुनरिति । द्रव्यज्ञानकाले विशेषणस्य द्वित्वस्यासत्त्वाद्विशिष्टज्ञानहेतुत्वं न घटत इति विवक्षितम् । न केवलं हेत्वभावाद् द्वे द्रव्ये इति ज्ञानानुपपत्तिः,किन्तु विषयाभावादपीत्याह—को वाऽस्येति । विषय इति । अत्र 'विशेषणस्यासत्त्वाद् विशेषणविशेष्ययोर्विषयत्वानुपपत्तेः'इति शेषः । न तु विषय इति । अत्र विशेष्यालम्बनत्वादिति शेषः । तदात्म्यभावो वास्तव आरोपितो वा? प्रथमं दूषयति—नासंभवादिति । द्वितीयं दूषयति—विशिष्टज्ञानस्येति । विरोधायेति (पृ.२०२)। भेदस्तादात्म्याभावोऽभेदस्तादात्म्यम् । तयोरेकत्र समावेशे भावाभावयोर्विरोध उच्छिन्न इति धर्मधर्मिणोर्भेदाभेदपक्षवत् अभेद एव भेद एवेत्यपि पक्षौ स्यातामित्यर्थः । भेदाभेदवति भेद एवेति अभेद एवेति वा नियमो नापादयितुं शक्यते व्याहतेरिति शङ्कते—नियम इति । भेदाभेदलक्षणनियमवति भेद एवेत्यादिनियमापादने व्याहतिमभिधत्से तर्हि व्याह-

तिहेतुं नियमानियमयोर्विरोधमङ्गीकुरु । अन्यथा हेत्वभावे व्याहतिरेव । व्याहतिरिति सोल्लुण्ठमाह—नूनमनियमेति । भेदाभेदपक्षवत् भेद एवाभेद एवेत्यपि पक्षौ स्यातामितीष्टापादनत्वात् प्रसङ्गाभाव इति शङ्कते—सर्वे पक्षा इति । विरोधानङ्गीकारे विरुद्धधर्माध्यासस्य भेदज्ञापकस्याभावादद्वैतापत्तिः । तथा च सर्वे पक्षाः सन्तीवति वाक्यमेव न स्यात्ततो भिन्नस्य परस्परभिन्नोष्ठपुटस्पन्दादेस्तन्निदानस्याभावात् । पक्षाणां च भेदानुपपत्तौ सर्वपदोपादानानुपपत्तेश्चेति परिहरति—न विरोध इति । स्वतोऽभिन्नस्य प्रमाणस्याभावात् । तस्यैव तत्र प्रमाणत्वापत्तेश्चैकतानुपपत्तिरित्याह—एकता चेति । समानाधिकरणामिति । अत्र व्यवच्छिन्नेति शेषः । तेन व्यवच्छित्तिव्यधिकरणस्योपलक्षणस्य संज्ञादेर्व्यवच्छेदः । अवच्छेदकामिति । ज्ञातमवच्छित्तिप्रत्यायकमित्यर्थः । तेन नीलरूपरहितपदार्थव्यावृत्तिसमानाधिकरणस्यापि नीलरूपरहितपदार्थतादात्म्याभावलक्षणां व्यवच्छित्तिं सत्तया प्रत्याययत उत्पलनीलगुणसमवायादेरुत्पलेन्द्रियसंनिकर्षादेश्चाप्रत्याययतश्चोत्पलगगनसंयोगादेर्व्यवच्छेदः । एवमपि गगनमात्मादेरन्यादिति शब्देनाऽऽत्मादिव्यावृत्त्या समानाधिकरणेन ज्ञातेन व्यावृत्तिप्रत्यायकेनातिव्याप्तिरित्यनाशङ्कनीयमेव । समानाधिकरणं सत् व्यवच्छित्तिप्रत्यायकमिति सामानाधिकरण्यस्यापि व्यवच्छित्तिप्रत्यायनोपयोगित्वस्य विवक्षितत्वात् । न च गगनमात्मादेरन्यादित्यस्य शब्दस्य व्यावृत्तिसमानाधिकरणत्वम् । व्यावृत्तिप्रत्यायनोपयोगिव्यधिकरणेनापि शब्देन घटः पटो नेति प्रत्यायनात् । विशिष्टप्रत्ययस्याविशेषणविषयत्वे उत्पलं नीलमुत्पलमित्यनयोरविशेषप्रसङ्गं परिहरति—अनीलव्यावृत्तामिति । एवंविधे च लक्षणे उप-

लक्षणस्य विशेषणत्वापत्तिचोद्यमपि न लगतीत्याह-अवच्छेदकत्वाविशेष इति। उपलक्षणमिति। अत्र यथा पटे नीलगुणवर्त्तिनीलत्वमिति शेषः। नीलत्वोपहितो नीलगुणो नीलगुणरहिताद् व्यावृत्तिधीहेतुरिति, काकादयस्तु गृहादीनां विशेषणं न तूपलक्षणमिति भ्रान्तिः कार्या। न च विशिष्टत्वं नाम षट्पदार्थव्यतिरिक्तमनुभवयुक्त्यभ्युपगमाभावादिति दूषयति-व्यावृत्तिश्चेति। ननूत्पलं नीलगुणरहितादन्यदित्यत्र व्यावृत्तेर्व्यावृत्त्यप्रत्यायकत्वे विशेषणत्वानुपपत्तिः, व्यावृत्तिप्रत्यायकत्वे तु व्यावृत्त्यन्तरापेक्षायामनवस्थेत्याशङ्क्य स्वप्रत्यायकत्वेनैव व्यावृत्तिप्रत्यायकतया विशेषणत्वोपपत्तेर्न प्रत्याद्यव्यावृत्त्यन्तरापेक्षेति नानवस्थेत्याह-न च व्यावृत्ताविति। ननु अदण्डव्यावृत्ते देवदत्तदण्डानां युगपदिन्द्रियसंबन्धाद्वर्त्तमानत्वाच्चावश्यं युगपदवभासे विशेषणस्यापि विशिष्टविषयत्वाद् द्वित्वनाशकाले द्वे द्रव्ये इति विशिष्टबोधानुपपत्तिरित्याशङ्क्याह—एवं क्वचिदिति। सत्त्व इति (पृ.२०३)। यदि द्वित्वोत्पत्त्यर्थं द्वित्वान्तरमिष्यते तर्हि तदुत्पत्त्यर्थं द्वित्वान्तरमेष्टव्यमित्यनवस्था द्वित्वोत्पादकादेव द्वित्वाद् द्वे द्रव्ये इति व्यवहारोपपत्तेः कार्यवैयर्थ्यञ्चेति। एकत्वेष्वेव काश्चिद् विशेषोऽस्तीति। अत्र 'न हि भवदुक्तं भवति एकत्वं तावदेवोक्तं भवति सैकमेकत्वमिति, नापि यावदुक्तं भवति सैकमेकत्वं तावदुक्तं भवति सैकैकत्वसहितमेकत्वम्' इति शेषः। ननु त्रित्वादिव्यवहारविषयेष्वेकत्वेषु सैकैकत्वरूपेष्वपि द्वित्वव्यवहाराभावान्न सैकमेकत्वं व्यवहारविषय इति कथमुच्यते तत एव तर्हि द्वित्वादिव्यवहार इति? न, एवं तर्हि सैकैकत्वरूपैस्त्रित्वारम्भकैर्द्वित्वानारम्भात् सैकैकत्वस्य द्वित्वानारम्भकत्वसिद्धेः। बुद्धेर्विशेषो विष-

यकृतो वेन्द्रियादिहेतुकृतः साक्षात्कारित्वादिर्वा ? प्रथमे उत्तरम्—विषयविशेषेति । द्वितीये उत्तरम्—अन्यस्य साक्षात्कारित्वादेरिति । विषयविशेषेन्द्रियादिहेत्वायत्तसाक्षात्कारित्वादिविशेषव्यतिरिक्तो द्वित्वजनकबुद्धिषु त्रित्वादिजनकबुद्धिव्यावृत्तो द्वित्वलक्षणकार्यगम्यो विशेषोऽतिप्रसङ्गशास्तेति वल्लभाचार्याः । तदपि न, त्रित्वादिजनकबुद्धिव्यावृत्तद्वित्वजनकबुद्ध्यनुगतहेतुवैषम्यमन्तरेण त्रित्वादिजनकबुद्धिविलक्षणपरस्परानुगतद्वित्वजनकबुद्धिरूपकार्यवैषम्यानुपपत्तेः।अनियमेति। यदेकस्य द्वयं तदन्यस्यापि द्वयमेवेति नियमो न स्यादित्यर्थः । अनियममुपपादयति–सैवेति । ननु यथा ऽदृष्टविशेषादग्नेरूर्ध्वज्वलनमेव न तु तिर्यग्ज्वलनम् , वायोश्च तिर्यग्गमनमेव न तूर्ध्वगमनमिति नियमः, एवमदृष्टविशेषादेव क्वचिद् द्वित्वमेव न त्रित्वं क्वचित्तु त्रित्वमेव न तु किञ्चिदपेक्ष्य द्वित्वमित्यपि नियमोऽस्त्वित्यत आह—अदृष्टविशेषेति । अदृष्टविशेषान्नियमोऽदृष्टविशेषनियमः । न च द्वित्वत्रित्वाश्रययोरुपाधिविशेषः परस्परव्यावृत्तोऽस्तीति शेषः।द्वे एकत्वे द्वे द्रव्ये इति वाभिमानो गणनामन्तरेण न जायत इत्यपेक्षाबुद्धिस्तत्र कारणमेष्टव्या द्वित्वाभिमानान्तरं वा ? प्रथमे दूषणम्–अपेक्षाबुद्धिविशेषमिति । अपेक्षाबुद्धेर्विशेष उक्तरीत्या नास्ति, अविशिष्टा च कथं द्वित्वत्रित्वादिविलक्षणाभिमानहेतुरित्यर्थः । द्वितीयं दूषयति–तत्राप्यभिमानान्तरेति । तथापेक्षाबुद्धिरिति । ननु यद्यपेक्षाबुद्ध्यादयोऽविशिष्टा एव द्वित्वत्रित्वादिप्रागभावरूपं सहकारिभेदमपेक्ष्य द्वित्वत्रित्वादिकार्यभेदजनकास्तर्हि द्वित्वोत्पत्तिकाल एव त्रित्वोत्पादकापेक्षाबुद्ध्यादीनां त्रित्वादिप्रागभावानां च सत्त्वात्सकलत्रित्वादिसंख्योदयप्रसङ्ग इति चेत् । न,

द्वित्वप्रागभावसमानाधिकरणैकत्वपर्यवसितापेक्षाबुद्धेर्द्वित्वहेतुत्वात्, त्रित्वादिप्रागभावसमानाधिकरणैकत्वपर्यवसितबुद्धेश्च त्रित्वादिहेतुत्वात्। न चैता बुद्धयो युगपदिति न द्वित्वत्रित्वादीनां युगपदुदयापत्तिरिति। अपेक्षाबुद्धेरविशेषाभिधानं तु द्वित्वादिप्रागभावमन्तरेणेति द्रष्टव्यम्। सेनावनादौ कथमिति। अस्य 'अत एव' इत्युपक्रम्य 'इति केचित्' इत्यन्तं परमतेन समाधानं, तद् दूषयति—तदसदित्यादिना [पृ० २०४]। तत्र सन्देहानुपपत्तेरिति। विशेषे सन्देहानुपपत्तेरित्यर्थः। न हि विंशतेरर्वाक् त्रयोविंशतेरुपरि न भवन्तीति निश्चये किं विंशतिरेकविंशतिर्द्वाविंशतिर्वेति संशय इतरव्यावृत्तं विंशत्येकविंशतिद्वाविंशतिसाधारणं धर्ममन्तरेण संभवति। न चेतरव्यावृत्तो विंशत्यादिसाधारणो धर्मो विंशत्याद्यन्यतमाविशेषमन्तरेण घटते। अन्यथा घटादिरहितायामपि मृदि घटपटसाधारणं धर्ममन्तरेणापि घटः पटो वेति सन्देहापत्तिरित्यर्थः। हेत्वन्तरमाह—अङ्गान्तरेति। महती महत्तरेति। भूयसी भूयस्तरेत्यर्थः। सेनावनादौ कथमित्यत्र स्वमतेन समाधानमाह—तस्माद्वस्तुस्थितेरिति। यदि स्वं स्वं प्रागभावमपेक्ष्य सेनावनादौ सहस्रादिसंख्योदयः कुतस्तर्हि सहस्रमेवाधिकं वेति नियतसंख्याप्रतीत्यभाव इत्यत आह—तदप्रतीतिरिति। तस्य सेनावर्तिनो बहुत्वस्य सहस्रत्वादिजात्यवच्छेदेनाप्रतीतिरिति विवक्षितं न तु बहुत्वस्यैवाप्रतीतिः भूयसी सेनेत्यादिप्रतीतेरुक्तत्वात्, अनेकत्वसंख्यां प्रत्यपेक्षाबुद्धिरुत्पादिका न तु व्यञ्जिकेत्युक्तत्वाच्च नियतापेक्षाबुद्धिर्द्वित्वसहितैकत्वबुद्धिरित्यादिका सहस्रत्वादिजातीनां संख्याश्रयाणां व्यञ्जिका।

न चैवमिति[पृ.२०६] । न चाहेतुकोऽविनाश इत्यर्थः । सामानाधिकरण्यमिति[पृ.२०७] । सामानाधिकरण्यमेकाधिकरणसंबन्धः, स च विशेषणतत्प्रत्याय्यव्यावृत्त्योः साधारणो धर्म इति तयोः सारूप्यमित्यर्थः । विशेषणविशेष्ययोरभेदो निरस्त इति 'अभेदेन'इत्यन्यथा व्याचष्टे–सारूप्येणेति(पृ.२०८)। सारूप्यं सामानाधिकरण्यं, तच्च वीणाशब्दयोः शब्दवीणेति वा स्यात् शुक्लो घट इतिवच्छब्दवती वीणेति वा स्यात्, रूपवान् घट इतिवत्, एवमुत्तरत्रापि । तावतापीति [पृ.२०९] । यदा द्वित्वोत्पत्तिकाले एकं द्रव्यमिति ज्ञानं तदाऽपि द्वित्वसामान्यज्ञानकालेऽपेक्षाबुद्धिनाशः, द्वित्वगुणज्ञानकाले च द्वित्वविनाश इति तदुत्तरकाले द्वे द्रव्ये इति ज्ञानानुपपत्तिस्तदवस्थेत्यर्थः । द्वित्वादिसंख्योत्पत्त्यनभिभूतस्येति । अत्र द्वित्वादिसंख्योत्पत्तिशब्देन द्वित्वादिसंख्योत्पत्तिपूर्वक्षणो विवक्षितः । तेनानभिभूतस्याप्रतिबद्धस्यैकत्वस्यैकं द्रव्यमिति विशिष्टज्ञानहेतुत्वम् । इह तु द्वित्वोत्पत्तिपूर्वक्षणः प्रतिबन्धको जात इत्येकं द्रव्यमिति ज्ञानं न जातमित्यर्थः । यथाश्रुते द्वित्वोत्पत्तेरेकं द्रव्यमिति ज्ञानजनकैकत्वप्रतिबन्धकत्वेन द्वित्वोत्पत्तिपूर्वक्षणे प्रतिबन्धकाभावाद् द्वित्वोत्पत्तिक्षणे एकमेकं द्रव्यमिति ज्ञानं दुर्वारमेवेति

एकतराप्रतीताविति (पृ.२१०) । परिमाणविशेषाप्रतीतावपि भूगोलकादिप्रतीतीरित्यर्थः । मानव्यवहारकारणमिति । मानव्यवहारविषय इत्यर्थः । नन्वियत्ताव्यवहारो मानव्यवहारः, स च पञ्च पञ्च पलानीत्यादिकोऽन्यत्राप्यस्तीत्यतिव्याप्तिरित्यत आह—मानव्यवहारास्त्विति । पलसंख्याव्यवहारविलक्षण इति । पलव्यवहारश्च सं-

ख्याव्यवहारश्च, ताभ्यां विलक्षण इत्यर्थः । तेन संख्यागुरुत्व-विषयमानव्यवहारव्यतिरिक्तमानव्यवहारविषयो गुणः परिमाणमिति लक्षणम् । यद्वा, मानव्यवहारो नाम परिमाण-व्यवहारः, स च पलादिव्यवहारविलक्षण इति नातिप्रसङ्ग इति। न च महत्त्वव्यवहारोऽवयववबहुत्वविषयः कुम्भादाविति ल-क्षणासिद्धिः संख्याद्यविषयत्वे सतीति लक्षणासिद्धेश्चेति वाच्यम् । द्व्यणुकबहुत्वाप्रतीतावपि त्र्यणुके द्वाभ्यामारब्धे द्वि-तन्तुकादौ महत्त्वव्यवहारात् अविशिष्टेऽवयवबहुत्वे प्रचिता-रब्धे महत्त्वोत्कर्षप्रतीतेश्च । प्रचयविशिष्टमवयवित्वं तथाविध-महत्त्वोत्कर्षप्रतीतिविषय इत्यपि न । अप्रचितैरप्यधिकैरारब्धे प्रचितत्रयारब्धे तुल्यमहत्त्वोत्कर्षप्रतीतेः । तत्र वृद्धत्वोत्कर्ष एव महत्त्वोत्कर्षविषय इति चेत् । न, अनुगतं विषयमन्तरेण प्राचिता-प्रचितारब्धानुगतमहत्त्वोत्कर्षविशेषप्रतीतेरनुपपत्तेः । अनुगतवि-शेषमन्तरेण महत्त्वविशेषोत्पत्तिरेव कथमिति चेत् ? प्रागभाव-विशेषादिति गृहाण । नन्वणुमहदित्यादिपदानां विना भाव-प्रत्ययं परिमाणविशेषावच्छिन्नद्रव्यवाचित्वात्तच्चातुर्विध्यम-नेनोक्तं स्यान्न परिमाणचातुर्विध्यमित्यत आह—भावप्रधान-इति (पृ.२११)। अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेति विवक्षितं भाष्यकारस्येत्यर्थः । तदेतादिति । अत्र तच्छब्देन महत्त्वं परामृशति न त्वणुत्वादीति । तृणोलपादिन्यायेनेति । यथोलपपदेन तृणविशेषेऽभिहिते तत्सन्निधिपठितसामान्यवच-नतृणपदस्योलपव्यतिरिक्ततृणपरत्वं निर्णीतं, तथाऽत्रापि मनः-शब्देन परमाणुविशेषेऽभिहिते सामान्यवचनपरमाणुपदस्य म-नोऽन्यपरमाणुपरत्वं निर्णेयमित्यर्थः । कुवलयादावणुव्यवहार-स्य गौणत्वार्थं मुख्ये बाधकमाह—महत्त्वोत्पत्ताविति ।

चाक्षुषत्वान्यथानुपपत्त्या चेति। चाक्षुषद्रव्यत्वेन महत्त्वानुमानादिसर्थः। प्रकर्षभावः प्रकृष्टता। भज्यत इति। सेव्यत इत्यर्थः। द्रव्यत्वेन परिमाणानुमानादिति न युक्तम्। परिमाणशब्देन महत्त्वविवक्षायामप्रसिद्धान्ततोऽणुपरत्यक्षत्वयोरापत्तेः, अणुमहत्त्वसाधारणपरिमाणविवक्षायामप्रसिद्धविशेषणत्वात् अणुत्वासिद्धावणुमहत्साधारणपरिमाणासिद्धेः इति चेत्। न, संख्याव्यावृत्तमहत्त्वसमवेतजातेराधारस्य परमाण्वादौ साधनात्। ननु संख्याव्यावृत्ता महत्त्वसमवेता जातिः किं महत्त्वत्वं तदवान्तरा ततः परा वा? नाद्यो बाधादप्रसिद्धान्ताच्च। नेतरः अप्रसिद्धविशेषणत्वादिति चेत्। न, महत्त्वसमवेतजातेः सामान्यतो विवक्षितत्वात्, विशेषविकल्पेन साध्यसामान्यदूषणे सर्वानुमानविलयादिति। इतोऽपि परमाण्वादौ न महत्त्वाभावकृतोऽणुत्वव्यवहार इत्याह—द्व्यणुकादिति(पृ.२१२)। यो हि परमाणावणुव्यवहारमिच्छति स द्व्यणुकादप्रकृष्टः परमाणुरिति व्यवहारमिच्छत्येव तद् यद्यणुत्वं महत्त्वाभावः न तर्हि तत्रापकर्षो भावतः सम्भवतीत्यर्थः। द्व्यणुकं परिमाणवदित्यत्र महत्त्वेन सिद्धसाधनमाशङ्क्याह—न द्व्यणुकस्य महत्त्वमिति। अन्यायश्चानेकार्थत्वमिति। न ह्येकत्र वाचकत्वशक्त्याऽन्यत्र तत्सादृश्येन च शब्दप्रयोगे उपपन्ने उभयत्रापि वाचकत्वकल्पनाबीजमस्ति, सिंहो देवदत्त इत्यादौ सिंहादिपदानां देवदत्तादिवाचकत्वकल्पनापत्तेरिति। यत्र त्वनेकेष्वेकनिमित्तमन्तरेण सादृश्यादिकमनुपजीव्य शब्दः प्रयुज्यते तत्रानेकार्थत्वमेव न्याय्यं, यथाऽक्षादिशब्द इति। पश्चादिति। अणुपरिमाणसिद्धेरनन्तरमित्यर्थः। स्वर्गादिशब्दवदिति। यथा हि "स्वर्गकामो यजेत" इत्यत्र दुःखासंभिन्ननिरतिशयसुखवाचकः स्वर्गशब्दो-

ऽर्थवादबलाद्,दुःखादिसम्भिन्ने तु सारूप्यादप्युपपद्यत इति गौण इति व्यवस्था, एवमणुशब्दोऽपि परमपूज्यकणादादिव्यवहारबलादणुपरिमाणे मुख्यः, आमलकादिपरिमाणे तत्सादृश्यात्प्रकर्षविशेषाभावादुपपद्यत इति गौण इत्यर्थः। उपपत्तेरिति। उपपत्तिरनुमानम्। यथा हि गगनं दीर्घत्वातिरिक्तपरिमाणाधिकरणं द्रव्यत्वादिति गगने महत्त्वसिद्धिः, एवं गगनं महत्त्वातिरिक्तपरिमाणाधिकरणं द्रव्यत्वादिति दीर्घत्वसिद्धिः। यथा च परमाणुर्ह्रस्वत्वातिरिक्तपरिमाणाधिकरणं द्रव्यत्वाद् घटवादिति परमाणावणुत्वसिद्धिः, एवं परमाणुरणुत्वातिरिक्तपरिमाणाधिकरणं द्रव्यत्वादिति ह्रस्वत्वसिद्धिरपि। दीर्घत्वादिनाऽर्थान्तरतानिवृत्त्यर्थं दीर्घत्वातिरिक्तादिपदम्। दीर्घत्वादिसिद्ध्याऽपि प्रकृतानुमानचरितार्थत्वस्य वक्तुं शक्यत्वादिति। ननु संस्थाने विशेषवत्येव दीर्घत्वं दृष्टमित्याशङ्क्य महत्त्वसमानयोगक्षेमतया परिहर्तुमुक्तम्—यथा हि महत्त्वं प्रकृष्यमाणमिति। केचित्तु दीर्घत्वं क्वचित् परमकाष्ठापन्नं प्रकृष्यमाणत्वान्महत्त्ववदित्यनुमानम्। यथा हि महत्त्वं प्रकृष्यमाणमित्यादिनोपपत्तेरुभयत्रापि तुल्यत्वादित्यन्तेनाक्षिप्तमिति व्याख्यातवन्तः, तन्न, समिदादिगतदीर्घत्वपक्षीकरणे बाधात्, गगनादिगतदीर्घत्वपक्षीकरणे त्वाश्रयासिद्धेः। दीर्घत्वजातिरप्रकृष्टत्वानधिकरणाश्रिता साक्षात्परिमाणत्ववावान्तरजातित्वान्महत्त्ववदित्युपपत्तिपरः प्रकृतो ग्रन्थ इत्यपि न। दीर्घत्वमात्रवृत्तित्वाभावादिना सोपाधित्वादिति। नन्वीश्वरबुद्धिः सकलैकत्वविषयत्वात् सकलद्रव्यवर्त्तिबहुत्वं जनयेत् न तु त्रित्वमित्याशङ्कामपनुदति—ईश्वरबुद्धेरिति [पृ. २१३]। सर्वैकत्वविषयाऽपि बुद्धिस्त्रित्वोत्पादकमहत्त्वमपेक्ष्य त्रित्वं चतुष्ट्वोत्पादक-

महत्त्वमपेक्ष्य चतुष्ट्वं जनयतीति । यद्वा, अदृष्टशब्देन त्रित्वादिप्रागभावो 'न दृश्यते' इति व्युत्पत्त्या विवक्षितः । रूपाद्युत्पत्तिसमकालमिति । अस्य महत्त्वे दीर्घत्वं च करोतीत्यनेनान्वयः । पूर्वत्रापरितोषात्पक्षान्तरमाह—द्रव्योत्पत्तिसमकालत्वाद्वेति । द्रव्योत्पत्तिकालोत्पन्नया द्व्यणुकात्रित्वसंख्यया त्रसरेणुमहत्त्वोपपत्तेर्न द्व्यणुकसंयोगकाले त्रित्वे प्रमाणमस्तीति पूर्वत्रापरितोषहेतुः । ईश्वरापेक्षाबुद्ध्यादीनां हेतूनां सत्त्वात्संयोगकालेऽपि द्वित्वं स्यादिति चेत् । न, ईश्वरापेक्षाबुद्धिजाऽनेकसंख्यायामारम्भकसंयोगस्यापि हेतुत्वात् । एवमपि यावद् द्व्यणुकसंयोगं संख्याप्रवाहः स्यादिति चेत् । न, द्रव्यप्रागभावस्यापि हेतुत्वस्वीकारात् । अन्यथा निष्प्रयोजनसंख्यानन्त्यापत्तेः । परमाणुद्वित्वद्व्यणुकबहुत्वव्यतिरिक्ता केवलेश्वरापेक्षाबुद्धिजन्या संख्या निष्प्रमाणिकेति रहस्यम् । विभागस्तु इति[पृ.२१४] । द्व्यणुकयोर्विभागात्संयोगनाशः, ततस्त्र्यणुकनाशः, ततस्तद्गतमहत्त्वनाश इति कारणविभागः परम्परया महत्त्वविनाशक एव न तूत्पादकः त्र्यणुकारम्भकसंयोगजनककर्मविनाशसमसमयोत्पन्नकर्मणा त्र्यणुकमहत्त्वसमकालमेव द्व्यणुकविभागारम्भादिति भावः । परत्वापरत्वे चेति । अत्र परिमाणसमसमयोत्पन्नादिकालत्रसरेणुसंयोगारभ्यत्वादिति शेषः । तथा वेगद्रवत्वादीनामपि द्व्यणुकगतो हि वेगो द्व्यणुकयोः संयोगात् त्र्यणुकसमये नष्ट इति न महत्त्वकारणम् । अव्यवहितपूर्वक्षणवर्त्तित्वाभावात् । न च त्र्यणुकोत्पत्तिक्षणे वेगोऽस्ति हेत्वभावात्, द्रव्यान्तरगतस्त्वप्रत्यासन्न एवेति । द्रवत्वादयस्तु तद्रहितैरप्यारब्धे महत्त्वदर्शनादप्रत्यासन्ना इति । तथोक्तं द्रव्य इति । द्रव्यपदार्थे बहूनां द्व्यणुकानां त्र्यणुकारम्भ-

कत्वमुक्तम् । तेनावयवबहुत्वादेव बलवदशक्तेस्त्र्यणुकमहत्त्व-मुपपन्नमिति, अणुपरिमाणकारणमित्युक्तप्रायमित्यर्थः । द्व्यणुकपरिमाणस्य त्र्यणुकपरिमाणारम्भकत्वे मानाभावाच्च । द्व्यणुकपरिमाणं परिमाणजनकं परिमाणासमवायिकारणं वा द्रव्यसमवायिकारणपरिमाणत्वात्तन्तुपरिमाणवत् इत्यादेरनणुत्वेन सोपाधित्वात् । न चास्य पक्षेतरत्वं मनःपरिमाणस्य पक्षपक्षतुल्यव्यतिरिक्तस्य व्यावर्त्यस्य सत्त्वात्, द्व्यणुकपरिमाणस्य यत्किञ्चित्परिमाणजनकत्वेनास्य चरितार्थत्वात्, अभिप्रेतत्र्यणुकपरिमाणजनकत्वासिद्धेरर्थान्तरग्रस्तत्वाच्च । द्व्यणुकपरिमाणं त्र्यणुकपरिमाणाजनकं परिमाणत्वाद् घटपरिमाणवदित्यादिना द्व्यणुकपरिमाणस्य त्र्यणुकपरिमाणजनकत्वनिषेधाच्च । अद्व्यणुकपरिमाणत्वं चात्र पक्षेतरत्वान्नोपाधिः । न च द्व्यणुकपरिमाणं त्र्यणुकपरिमाणजनकं द्व्यणुकपरिमाणत्वादिति व्यतिरेकिणा सत्प्रतिपक्षत्वम् । अस्य त्र्यणुकादेः सपक्षादपि व्यावृत्तत्वेनासाधारणत्वात् ।

अथ त्र्यणुकपरिमाणमसमवायिकारणजन्यं कार्यपरिमाणत्वात् घटपरिमाणवदिति सामान्यतस्त्र्यणुकपरिमाणासमवायिकारणसिद्धौ द्व्यणुकपरिमाणं त्र्यणुकपरिमाणासमवायिकारणं द्व्यणुकपरिमाणत्वान्न यदेवं न तदेवं, यथा घट इति केवलव्यतिरेकिणा निरस्ताप्रसिद्धविशेषणत्वकलङ्केन सत्यपि सपक्षे तद्व्यावृत्तत्वानिश्चयादुन्मूलितासाधारणत्वदोषेण सत्प्रतिपक्षत्वमिति नवीनतार्किकमतमाश्रयसे, तन्न । त्र्यणुकपरिमाणं परिमाणव्यतिरिक्तासमवायिकारणजन्यमुभयमात्रानिष्ठनिष्ठ(?)जन्यपरिमाणत्वादित्यादिना सामान्यतः परिमाणव्यतिरिक्तत्र्यणुकपरिमाणासमवायिकारणसिद्धौ तत्रैव यत् त्र्यणुक-

परिमाणासमवायिकारणं तदपरिमाणमिति साध्यव्यापकत्वनिश्चयादपरिमाणत्वेन सोपाधित्वात् । पक्षतत्तुल्यव्यतिरिक्तघटादिपरिमाणस्य व्यावर्त्यत्वान्न पक्षेतरता । द्व्यणुकपरिमाणं न परिमाणारम्भकमणुत्वान्मनःपरिमाणवादित्यादीनि तु द्रव्यासमवायिकारणपरिमाणत्वादिना सोपाधित्वादुपेक्षणीयानि । अथ द्व्यणुकबहुत्वं त्र्यणुकपरिमाणानारम्भकं बहुत्वाद् घटबहुत्ववदिति द्व्यणुकबहुत्वस्यापि त्र्यणुकपरिमाणकारणत्वनिषेधः किं न स्यादिति चेत् । उच्यते, त्र्यणुकलिङ्गजास्मदाद्यपेक्षाबुद्धिजन्यद्व्यणुकबहुत्वस्य धर्मित्वे सिद्धसाधनत्वादीश्वरापेक्षाबुद्धिजन्यद्व्यणुकबहुत्वस्य त्र्यणुकपरिमाणाव्यवहितपूर्वक्षणवर्तित्वरहितस्यापि धर्मित्वे सिद्धसाधनादेव त्र्यणुकपरिमाणाव्यवहितपूर्वक्षणवर्तिनः पुनरीश्वरापेक्षाबुद्धिजन्यबहुत्वस्य धर्मित्वे धर्मिग्राहकप्रमाणबाधः । तस्य त्र्यणुकपरिमाणे समवायिकारणत्वेनैव सिद्धेः । त्र्यणुकपरिमाण बहुत्वसंख्याकारणामिति । अत्र बहुत्वसंख्यामात्रकारणकमिति विवक्षितम् । मात्रशब्देन महत्त्वप्रचययोर्निवृत्तिः।तेन महत्त्वाद्यजन्यं बहुत्वसंख्याकारणकं चेति द्वयं साध्यं, तेन महत्त्वबहुत्वाभ्यामारब्धान्महत्त्वात् सपक्षादपि व्यावृत्तेः परिमाणप्रचयासंभवे सति कार्यमहत्त्वादित्यसाधारणो न व्यतिरेकीति निरस्तम् । बहुत्वजन्यत्वं महत्त्वाद्यजन्यत्वं चाश्रयभेदेनान्यत्र सिद्धमिति नाप्रसिद्धविशेषणता, एकत्र द्वयमसिद्धमिति न विद्यमानसपक्षता । "न बहुत्वमिति भाष्यं केवलबहुत्वनिषेधकम्"इति व्याख्यायये महत्त्वस्थाने बहुत्वं कारणमेव न भवतीत्येवंपरमेतद् व्याचक्षते, तान् प्रत्याह--न तु समानेति(पृ०२१९) । तेन महत्त्वान्येव महत्त्वमारभन्त इति पूर्वभाष्ये महत्त्वे महत्त्वानि चेति विग्रहाद्यत्र म-

हत्वे प्रचयानपेक्षमहत्त्वारम्भके तत्रान्ययोगव्यवच्छेदार्थ ए-वकारार्थः, यत्र महत्त्वानि तत्रायोगव्यवच्छेद इत्यभिप्रेतम् । ननु यद्यपि तूलपिण्डयोर्न बहुत्वं तथापि तूलपिण्डतदवयवपरम्परायां द्व्यणुकपरमाणुपर्यन्तायां बहुत्वमस्ति तत् साक्षात् परम्परया वा द्वितूलकावयववृत्तित्वात् । द्वितूलके महत्त्वमारभते इति किं प्रचयेनेत्येतदाशङ्कानिराकरणभाष्यमवतारयति—अन्यथेति । यावन्तो हि प्रचिततूलपिण्डाभ्यामारब्धे द्वितूलके तूलपिण्डद्व्यणुकपरमाण्वादयस्तावन्त एवाप्रचिताभ्यां तूलपिण्डाभ्यामारब्धे द्वितूलके न्यूनपरिमाणे तत्तुल्यगुरुत्ववति । अन्यथा तुलया धृतस्य समानफलत्वानुपपत्तेः, तदवयवपरम्परान्यूनत्वे तद्गुरुत्वानामप्यल्पत्वात् । न च गुरुत्वानामबहुत्वेऽप्युत्कर्षवत्तया बहुभिरपि गुरुत्वैर्विशिष्टता । तूलजातीयतया गुरुत्वोत्कर्षाऽभावानुमानात् । तस्मादप्रकृष्टगुरुत्वानामविशेषात् परम्परावयवबहुत्वस्याप्यविशेष इति प्रचय एव महत्त्वातिशयजनक इत्यर्थः । परमाणुपरिमाणस्याकारणत्वादिति (पृ.२१६)। परमाणुपरिमाणं द्व्यणुकपरिमाणाजनकं परिमाणत्वात् घटपरिमाणवदित्यनुसन्धेयम् । अस्माकं तु भाक्तव्यवहारपौनरुक्त्यान्यथानुपपत्तेरिति तर्को योगिप्रत्यक्षसहितक्लिष्टत्वान्न परं प्रति परमाण्वादिष्वणुत्वात् भिन्नं ह्रस्वत्वं साधयति । तस्मात्परमाणुगतमेतदणुत्वमेतदन्याणुत्वव्यतिरिक्तैतत्परमाणुनिष्ठपरिमाणभिन्नं सत्त्वात् घटत्वादित्याद्यणुत्वव्यतिरिक्तह्रस्वत्वसाधनं द्रष्टव्यम् । ननु प्राचीनन्यूनपरिमाणादधिकं परिमाणमुत्पन्नं प्राचीनन्यूनपरिमाणविनाशकारणमस्तीत्याशङ्क्य किं प्राचीनन्यूनाधिकपरिमाणप्राचीनन्यूनपरिमाणसमवायिकारणासमवायिकारणव्यतिरिक्तानि समवायिकारणसमवायिकारणानि त्ता-

न्येव वेति विकल्प्य प्रथमे कल्पे दूषणमाह–परिमाणान्तरोत्पत्तौ चेति(पृ.२५७)। द्वितीये दूषणमाह–कारणसंख्येति। कारणं प्राचीनपरिमाणसमवायिकारणं,संख्यादयश्च प्राचीनपरिमाणासमवायिकारणानि, तेषां तत्कारणत्वात् । प्राचीनन्यूनपरिमाणकारणत्वादित्यत्राधिकपरिमाणकारणत्वं न घटत इति शेषः । शरीरसंयुक्ताहारावयवैः प्राचीनशरीरावयवसहितैरारब्धं शरीरान्तरमधिकपरिमाणसमवायिकारणमस्तु, कथं समवायिकारणान्तराभाव इत्याशङ्क्य किं पूर्वशरीरावयवाः पूर्वशरीरे विद्यमाने शरीरान्तरमारभन्ते विनष्टे वेति विकल्प्य प्रथमे दूषणमाह–संयोगीति । शरीरद्वयानुपलब्धेर्मूर्तानां समानदेशत्वानुपपत्तेश्चेति भावः । द्वितीये त्वाश्रयविनाशात् परिमाणविनाशः सिद्ध इति नासौ दूषितः । ननु मा भूत्समवायिकारणान्तरं पूर्वशरीरावयवतत्संयुक्तद्रव्यान्तरगतं तत्संयुक्तद्रव्यमात्रगतमेव वा सातिशयबहुत्वाद्यसमवायिकारणान्तरं भविष्यतीत्यत आह–अकारणेति । संयुक्तद्रव्यमात्रगतबहुत्वादिकारणपक्षे दूषणमाह–असमवायीति ॥

पूर्ववत्प्रमाणलक्षण इति[पृ.२१८]। यथा मानव्यवहारो व्यवहर्तव्ये परिमाणे प्रमाणं रूपादिगुणवर्गादगुणवर्गाच्च व्यावृत्ततया परिमाणस्येतरभेदव्यवहारसाधकत्वाल्लक्षणं च, तथा पृथगिति व्यवहारः पृथक्त्वे प्रमाणं लक्षणं च भविष्यतीत्यनुग्राह्यप्रदर्शनम्। भेदस्य साधकस्यानुग्राहकाभावं शङ्कते–तर्कोस्त्विति । तर्कस्तु न स्यादिति । अत्रेतरभेदसाधकस्येति शेषः । न केवलमनूकूलतर्काभावात् पृथक्त्वस्येतरभेदसाधकमनुमानमयुक्तं,

किन्तु पृथक्त्वपदमन्योन्याभाववाचकम् इतरत्वादिपदपर्यायत्वात् भिन्नत्वादिपदवदिति प्रतिपक्षाक्रान्तत्वाच्चेत्याशयवानाह-अन्यपदार्थान्तरमितरद् भिन्नमिति । तत्र सत्प्रतिपक्षत्वं निराचष्टे-पृथगादिशब्दा इति । भिन्नत्वादिपदानामप्यन्योन्याभाववाचकत्वानङ्गीकारात् साध्यविकलो दृष्टान्त इति भावः । अनुकूलतर्काभावं परिहर्तुं घटात्पटः पृथगन्य इत्यादौ पृथगन्य इति व्यवहारस्यान्योन्याभावविषयत्वे घटादिति पञ्चमी किमर्थौ किं प्रातिपदिकार्थ एव पृथगन्य इत्याद्युपपदमहिम्ना किं वाऽन्योन्याभाव एवेति मनसि विकल्प्य प्रथमं पञ्चमीसम्बन्धानुपपत्तिं दर्शयति-न हि घटात्पट इति । घटात्पटो न भवतीति घटावधेः पटे तादात्म्याभावोऽसाधुभूतयैव पञ्चम्या दर्शितः, तादात्म्याभावस्य घटावधित्वे घटात्पटो न भवतीति प्रयोगस्य साधुत्वप्रसङ्गः, घटः पटो न भवतीति प्रयोगस्य चासाधुत्वप्रसङ्ग इति शेषः । द्वितीयं पक्षमुत्थापयति—प्रातिपदिकार्थमात्र एवेति । दूषयति—नेति । "अन्यारादितरर्ते" [पा० सू० २-३-२९] इति सूत्रमन्यशब्दार्थमहिम्ना पञ्चमीत्येवंपरं न त्वन्यशब्दमहिम्नेति । तथा सति पृथग्भिन्न इत्यादौ पञ्चमीविरहापत्तेः । तत्र पृथग्भिन्न इत्युपपदमहिम्ना पञ्चमीत्यचारु । अन्यशब्दार्थस्यैकस्यास्मादिदमन्यदस्मात्पृथगस्माद् भिन्नमित्यादौ पञ्चमीप्रयोजकत्वे सम्भवति पृथगादिशब्दानां प्रयोजकत्वकल्पनायां गौरवादिति, बलवद्बाधकमन्तरेण विधिरूपं पञ्चम्यर्थमुत्सृज्य, शब्दमहिम्ना निरर्थकैव पञ्चमीत्यङ्गीकारे सकलवृद्धव्यवहारविप्लवाच्च । न च प्रातिपदिकार्थेनैव सार्थ-

कता । तस्य प्रातिपदिकेनैव गतार्थत्वात् । तस्मादन्यशब्दार्थमहिम्ना पञ्चमी न शब्दमाहिम्नेति स्थिते यदि पृथगादिशब्दानां तादात्म्याभावोऽर्थः, तर्हि घटो नेत्यत्रापि पञ्चमीप्रयोग इति । तदनेन यद्यन्योन्याभावः पृथक्त्वं स्याद् अवधिनिरूप्यः स्यादिति तर्को दर्शितः । ननु न पृथगादिशब्दसमानार्थो नञ्, पृथगादिशब्दानामन्योन्याभावविशिष्टवाचकत्वात् नञश्च निष्कृष्टान्योन्याभाववाचकत्वात् कथं पृथगादिशब्देन समानार्थतया नञोऽपि योगे पञ्चमीप्रसङ्ग इति शङ्कते—नञर्थविशिष्ट इति । भवतु घटः पटो नेत्यत्र निष्कृष्टाभाववाचकत्वम्, अपट इत्यत्र नञ्समासे तादात्म्याभावविशिष्टोऽर्थ इत्यपट इत्यत्र पटान्न भवतीत्यपट इति विग्रहः स्यात् पटो न भवतीत्यपट इति च न स्यादिति । समाधत्ते—नेति । तृतीयं पक्षं दूषयति—न च पञ्चमीति । योऽर्थ इति । अत्रावधिनिरूप्य इति शेषः । धर्मान्तरमिति । अत्रावध्यनिरूप्यादन्योन्याभावादिति शेषः । अविशिष्टाद्विशिष्ट्यमेव पृथक्त्वमस्त्विति शङ्कते—पृथक्शब्दस्येति । समाधत्ते—शब्दबुद्धिदण्डाद्यविशिष्टत्वेऽपि तद्विशिष्टस्येति । तद्विशिष्टस्येति पृथक्त्वविशिष्टस्येत्यर्थः । न हि व्योमात्ममैत्रादीनां विशिष्टत्वमात्रं पृथक्त्वं विशिष्टमात्रस्य कुम्भादावपि विद्यमानत्वेन कुम्भादिपृथक्त्वरूपत्वानुपपत्तेः । अपि च शब्दबुद्धिदण्डादिविशिष्टत्वमनाकाशाऽचेतनाऽदण्डिभ्यो व्योमादीनां पृथक्त्वमिति वाच्यं, तन्न, शब्दाद्यभावदशायामपि गगनादौ पृथक्त्वव्यवहारादिति भावः । यस्तु घटादिभ्यो वैधर्म्यमेव पटादीनां पृथक्त्वमाह, स किं वैधर्म्यशब्देन घटाद्यविद्यमानधर्मत्वमेव वैधर्म्यमाचष्टे किं वा घटादिधर्मविजातीयधर्मत्वम् ? प्रथमे दूषणमाह—एतेनेति । व्यः

वहितां पञ्चमीसम्बन्धानुपपत्तिं परामृशति । यदि घटाद्यविद्यमानधर्मत्वं पटादीनां पृथक्त्वं तर्हि घटाद्यविद्यमानधर्मवान् पट इत्यत्रापि घटादिति पञ्चमीप्रसङ्ग इत्यर्थः । कश्चित् एतेनेति शब्दादिवैधर्म्याभावेऽप्याकाशादौ घटपृथक्त्वादेर्व्यवहारादिति व्याख्यातवान्, तन्न । शब्दाद्यभावेऽपि घटाविद्यमानानन्तधर्मसत्त्वात् । द्वितीये दूषणमाह—श्यामादिति । श्याम एव परमाणौ श्यामविजातीयरूपसत्त्वादित्यर्थः । जातिसङ्करेति । जातिरूपमपि शाबलेयावधिकं पृथक्त्वं शाबलेयान्योन्याभाववति सर्वस्मिन् द्रव्ये वक्तव्यं, न तु शाबलेयेऽपि । शाबलेयः शाबलेयात् पृथगिति व्याघातात् द्रव्यत्वेन तुल्यव्यक्तिकतापत्तेश्च । तथा च शाबलेयावधिकं पृथक्त्वं गोत्वपरिहारेण घटादौ वर्तमानं गोत्वं च शाबलेयावधिकं पृथक्त्वपरिहारेण शाबलेये वर्त्तमानं शाबलेयादौ सङ्क्रीयत इति सङ्करः । यद्वा, घटावधिकं पृथक्त्वं पटावधिकपृथक्त्वाभाववति पटे वर्तते पटावधिकं च पृथक्त्वं घटावधिकपृथक्त्वाभाववति घटे वर्तते तदनयोः स्तम्भादौ सङ्करादुभयनिरासो विशेषाग्रहादिति । व्यभिचाराच्चेति । रूपाद्यभावेऽपि वाय्वादौ पृथक्त्वमिति व्यभिचारादित्यर्थः । गुणसादृश्यं तद्योगो गुणयोग इति । स एवेति । भेद एवेत्यर्थः । भेदशब्देन स्वरूपं विवक्षितं, तादात्म्याभावो वा, वैधर्म्यं वा ? प्रथमं दूषयति—न स्वरूपस्येति । द्वितीयतृतीयावपनुदति—इतरेतराभाववैधर्म्यं चेति । तथा व्यवहारोपपत्तेरिति । द्वौ पृथक् त्रयः पृथगिति व्यवहारोपपत्तेरित्यर्थः । यथा द्वौ शुक्लाविति व्यवहार एकैकपर्यवसितशुक्लगुणाभ्याम्, अन्यथा द्विशुक्लत्वादेरापत्तेरित्याह—द्वौ शुक्लाविति व्यवहारवदिति । अन्योन्यावधित्वानवधित्वाभ्यामिति । चैत्रसम-

वेतमेकपृथक्त्वं मैत्रावधिकं, मैत्रसमवेतमेकपृथक्त्वं चैत्रावधिकं, चैत्रमैत्रौ पृथगिति प्रतीतिविषयस्तु पृथक्त्वं न चैत्रावधिकं नापि मैत्रावधिकमतो विरुद्धधर्माध्यासेनैकपृथक्त्वाभ्यां द्विपृथक्त्वस्य भेद इति। नन्वस्त्वन्योन्यावधिकाभ्यामन्योन्यानवधिकस्य द्विपृथक्त्वस्य भेदो गुणत्वं तु कुतोऽनेकसमवेतस्य जातिभावादिति शङ्कां परिहरन्नुपसंहरति—तस्मादिति। तथाभूतेनेति। एकैकस्मिन् कात्स्न्र्येन वर्तमानेनेत्यर्थः। यथा द्वित्वं व्यासक्तवृत्तित्वादव्यासक्तवृत्तेः सामान्याद्भिद्यत इति परिशेषाद् गुणः, एवं द्विपृथक्त्वमपीत्यर्थः। यदि द्विपृथक्त्वमन्योन्यानवधिकत्वादेकपृथक्त्वाभ्यामन्यदिति तर्हि देवदत्ताच्चैत्रमैत्रौ परौ न तु चैत्रान्मैत्राद्वेति प्रतीयमानं द्विपरत्वमन्योन्यानवधिकत्वाच्चैत्रमैत्रैकपरत्वाभ्यां भिन्नं प्रसज्यते इति शङ्कते—एवं तर्हीति। किं समानदेशस्थयोश्चैत्रमैत्रयोर्देवदत्तमपेक्ष्य ये एकपरत्वे ताभ्यां चैत्रमैत्रौ पराविति द्विपरत्वस्यान्योन्यावधिकत्वं भेदकं किं वा न्यूनाधिकदेशस्थयोः चैत्रमैत्रयोर्ये एकपरत्वे ताभ्याम्? आद्यं दूषयति—एकपरत्वस्यापीति। तथाभूतत्वेऽन्योन्यानवधिकत्वे विरोधाभावेनैकपरत्वयोरन्योन्यानवधित्वावधित्वरूपविरुद्धधर्माध्यासाभावेन भेदाभावात्तादात्म्यनिषेधाभावादित्यर्थः। इदमेवोपपादयति—न हीति। समानदेशस्थयोरिति। अत्रान्योन्यापेक्षयेति शेषः। न च तं विनाऽन्योन्यापेक्षया संयुक्तसंयोगविशेषं विना ते अन्योन्यावधिके परत्वापरत्वे भवत इति। द्वितीयमुत्थापयति—यत्रास्तीति। यत्रेति ययोर्न्यूनाधिकदेशस्थयोरित्यर्थः। अस्तीत्यत्रान्योन्यापेक्षया संयुक्तसंयोगविशेष इति शेषः। अस्त्वन्योन्यावधिकत्वं न्यूनाधिकदेशावस्थितपरत्वस्यान्योन्यानवधि-

त्वेन तु ततो भेदः किं द्वौ परावितिप्रत्ययसिद्धस्य निर्विशेषस्य द्विपरत्वस्य किं वा द्वौ परतरावितिप्रत्ययसिद्धस्य द्विपरतरत्वस्य किं वा द्वौ परपरतरावितिप्रत्ययसिद्धस्य द्विपरपरतरत्वस्य ? न प्रथमद्वितीयौ। देवदत्तात् चैत्रमैत्रौ निर्विशेषपरौ परतरौ वेति प्रतीतेरेव सिद्धेरित्याह—न तत्रापीति। कथं तर्हि द्वे परे इति व्यवहार इत्यत आह—तदना दृत्येति। तत तारतम्यम्, नादृत्य अविवक्षित्वेति। तृतीयं पक्षं दूषयति-न तु व्यासक्तवृत्तिरिति। अनतिशयो यद्यतिशयविरोधिनी जातिरेव तर्हि सङ्करात्तयोरेकत्रानुपपत्तिः। अथातिशयत्वजातेरभावोऽनतिशयस्तथापि भावाभावयोरेकत्रानुपपत्तिरेवेति। इदं चाचार्येण यथानुभवमभिहितम्। अनुभवे विप्रतिपद्यमानस्त्वनुमानेन बोधनीयः। तत्रानेकपृथक्त्वे तावत् आकाशं संख्यात्वानधिकरणात्मगुणाधिकरणं द्रव्यत्वात् घटवदित्यनुमानं, द्विपृथक्त्वे त्वाकाशमाकाशनिष्ठसंयोगत्वाविभागत्वसंख्यात्वानधिकरणत्रिनिष्ठत्वानधिकरणद्विष्ठगुणाधिकरणं द्रव्यत्वात् घटवत्। एवं त्रिपृथक्त्वाद्यप्यूहनीयम्। द्विपरत्वप्रतिवन्दिनिरासस्तु साधकमानाभावादेव। न च परत्वजातिरनेकसमवेतसमवेता परत्वजातित्वात् सत्तावत्, एवं परत्वजातिरुभयमात्रवृत्तिसमवेता परत्वजातित्वात् सत्तावदित्यादिनाऽनेकपरत्वद्विपरत्वादिसिद्धिरिति वाच्यम्। परत्वानधिकरणवृत्तित्वेन सोपाधित्वात्। तन्निषेधे तु प्रमाणं परत्वं नानेकवृत्तिवृत्ति द्रव्यावृत्त्याकाशवृत्त्यवृत्तित्वात् रूपत्ववादिति। न चात्र परत्ववृत्तित्वमुपाधिः उभयसिद्धैकपरत्वमात्रवृत्तिजातौ साध्यव्यापकत्वभङ्गात्। न चैकपरत्वमात्रवृत्तित्वानधिकरणपरत्ववृत्तित्वाभाव उपाधिः,साधनव्यापकत्वादिति। जातिसङ्कर इति(पृ.२२०)।

द्वित्वत्रित्वादिजातीनां पृथक्त्वजात्या सङ्करो द्रष्टव्यः। "एकपृथक्त्वाद्यपरसामान्याभावः" इति भाष्यमेकत्वादिसामान्यमेव पृथक्त्ववर्तिशङ्क्यमानमकपृथक्त्वादीत्युक्तमिति व्याख्येयम्। पृथक्त्वाधिकरणप्रत्याद्यव्यावृत्तिसमानाधिकरणत्वाभावात् द्वित्वादीनां द्विपृथक्त्वादिविशेषणत्वानुपपत्तेः। "संख्यया तु विशिष्यते" इत्यन्यथा व्याचष्टे—विशिष्यते उपलक्ष्यत इति। ननु यदि द्वित्वत्रित्वादिजातयो न पृथक्त्वे तर्हि किञ्चित् पृथक्त्वं द्वाभ्यामारभ्यते किञ्चित्त्रिभिरिति न स्यात् कार्यवैषम्यमन्तरेण कारणवैषम्यानुपपत्तेरित्यत आह—कारणविशेषात्प्रकर्षनिकर्षलक्षणाविशेषस्त्वस्त्येवेति। एवकारेण द्वित्वत्रित्वादिजातिनिषेधः। यद्वा, "एतावांस्तु विशेषः" इत्यादि भाष्यं पृथक्त्वावान्तरसामान्यनिषेधपरतया किं न व्याख्यातमन्यैरिवेत्यत आह—कारणविशेषादिति॥

ननु पूर्वद्रव्यादेरन्यदेव समर्थमुत्पन्नं पूर्वमेव वा समर्थात्मना परिणतं द्रव्यादीनारभ्यते, किं संयोगेनेत्यत आह—क्षणभङ्गेति। परिमाणवादनिरासस्तादात्म्यभङ्गेऽस्त्वदृष्टमेवागन्तुकं किं संयोगेनेति शङ्कते—अदृष्टादिति (पृ. २२१)। अदृष्टसंपादकप्रयत्नेऽप्यदृष्टान्तरमेव हेतुरस्तु किं संयोगेनेत्यत आह—अदृष्टान्तरेति। संयोग आत्मलाभार्थं कर्मापेक्षत इति कथमनपेक्ष इत्यत आह—द्रव्ये तदवयवा इति। सहकारित्वं न किञ्चिदपेक्षते इति। अत्र स्वोत्पादकातिरिक्तमिति शेषः। अन्यथा अवयवसंयोगस्य द्रव्यारम्भेऽवयवादिसहकारिसापेक्षत्वान्निरपेक्षत्वव्याकोपादिति। 'एतेन चरमभावि' इत्यादि परमतम्। ये तु 'गुणकर्मारम्भे सा-

पेक्षः' इति स्वोत्पत्त्यनन्तरभाविकारणापेक्ष इति व्याचक्षते, तान्प्रत्याह—अपेक्षणीयस्येति [पृ. २२२]। पाकजारम्भे वह्निसंयोगापेक्षणीयस्योष्णस्य स्पर्शस्य महत्त्वारम्भे प्राशिथिलसंयोगापेक्षणीयस्वाश्रयावयवप्राशिथिलसंयोगस्य कर्मारम्भेऽभिघातनोदनापेक्षणीयस्पर्शवेगादेश्च परमभावित्वाभावादिति। ननु यथा संयुक्तप्रतीतिः संयोगे प्रमाणमेवमितरव्यवच्छेदकत्वाल्लक्षणमपि, ततः संयोगः संयुक्तप्रत्ययनिमित्तमित्यनेनैव लक्षणसिद्धेः अथ कथं लक्षणमिति प्रश्नोऽनुपपन्न इत्यत आह—प्रत्येतव्यस्येति। पदमग्रे गच्छतः पृष्ठतो धावता संयोगोऽन्यतरकर्मज एवाग्रेसरकर्मणः पुरोदेशाभिमुखत्वेन पृष्ठदेशावस्थितेन संयोगानारम्भकत्वात्। तन्न युक्तं क्रियावता निश्चलस्येति अत आह—तदभिमुखेति [पृ. २२३]। विभूनां मूर्तैरवयविभिरवयवसंयोगजसंयोगदर्शनात् किमुच्यते विभूनां मूर्तैरिति अत आह—अवयविभिरिति। संयोगान्तरस्यैकस्माद् द्वाभ्यां बहुभ्यश्चानुदयात्। स चेति। चकारः समुच्चये न घटत इत्यन्यथा व्याचष्टे—चशब्द इति। अनारम्भकत्वमभिप्रैतीति(पृ.२२४)। अत्रारम्भकत्वे हि ताभ्यामेकद्व्यणुकारम्भे मूर्तानां समानदेशत्वानुपपत्तेः। अन्यपरमाणुद्वयसंयुक्ताभ्यामन्यद्व्यणुकद्वयानुत्पादे तद्वतसंयोगद्वयानुपपत्तिरिति भावः। अणुशब्देन द्व्यणुकविवक्षायामन्याऽणुद्वयसंयुक्ताभ्यां ताभ्यां द्व्यणुकोत्पत्तिव्युत्पादनं न घटत इति अन्यथा व्याचष्टे—अण्वोरिति। ननु परस्परसंयुक्तयोः पार्थिवाप्ययोरण्वोः क्रमेणाप्यन्यपार्थिवाप्यपरमाणुभ्यां संयोगौ भवतः तथापि द्व्यणुकद्वयपूर्वकं संयोगद्वयमेकस्मात् संयोगाद् घटत इति किमर्थं युगपद्ग्रहणमत आह—संयोगयौगपद्येनेति। कारणसंयोगि-

नाप्यवयवान्तरेणावयवी न संयुज्यत इति पूरयति—अकारणेनेति शेष इति (पृ. २२५)। यद्यदकार्यत्वे सतीति। यद्यदविनश्यदवस्थकार्यत्वे सतीति विशेषणीयम्। अन्यथा विनश्यदवस्थतुरीसंयुक्ततन्तुकार्येण पटेन व्यभिचारात्। उक्ततर्कसिद्धये परमाणुद्व्यणुकयोः संयोगाभावे द्व्यणुकयोः संयोगो न स्यादित्यस्य सिद्धये। न च द्व्यणुकयोः संयोगाभावः। विमते द्व्यणुके संयुक्ते संयुक्तोपादानत्वात् घटपटवदित्यनुमानात्। तस्मिन् काल इति [पृ. २२६] द्व्यणुकपरमाणुसंयोगानुत्पत्तिकाले इत्यर्थः। अथ परमाण्वोः संयोगो द्व्यणुकपरमाणुसंयोगावारभ्य परस्परकारणसंयुक्तद्व्यणुकयोः संयोगं कुतो नारभत इत्यपि न युक्तम्। परमाण्वोः संयोगस्य द्व्यणुकपरमाणुसंयोगविपक्षत्वे पूर्वमेव द्व्यणुकयोः संयोगापत्तेः। द्व्यणुकपरमाणुसंयोगसापेक्षत्वे तत एव द्व्यणुकयोः संयोगोपपत्तेः परमाण्वोः संयोगस्याकारणत्वस्थितेः। संयोगो हीति। विभागमनुत्पाद्येति। उत्पाद्यविभागाभावोपदर्शनं विरोध्यभावेन संयोगारभ्यसंयोगस्य विभागाविरोधित्वोपपादनार्थम्। अनुत्पाद्येति उत्पाद्यविभागदर्शनं कर्मजन्यसंयोगस्य विभागाविरोधित्वोपपादनार्थम्। ततो विरोधादिति(पृ.२२७)। एकस्य संयोगरूपकार्यस्य विरोधित्वाविरोधित्वलक्षणविरोधप्रसङ्ग इत्यर्थः। त्रैविध्यमेवेति एवकारेण कर्मसंयोगाभ्यामारब्धस्य संयोगान्तरस्य व्युदासः। अन्वयव्यतिरेकाविति। अन्वयव्यतिरेकसहितं प्रत्यक्षमित्यर्थः। विभागं न सहन्त इति। स तु विभाग इति विविधं भागम्। यथाश्रुत इति। अजसंयोगं पक्षीकृत्य नास्तित्वं साध्यत इत्यर्थः। संयोगे धर्मिण्यजत्वाभावः साध्यत इति पक्षेऽपि किमन्यतरकर्मजा-

दिस्त्रिविधः संयोगो धर्मी संयोगान्तरं वा ? आद्ये साधनवैयर्थ्यमित्याह—त्रिविध इति । किमधिकमिति । द्वितीयं दूषयति—तदतिरिक्तस्येति । ननु प्रदेशोऽवयवः स च आकाशादीनां नास्तीति कथं तेषु प्रदेशवृत्तिः संयोग इत्यत आह - प्रदेशश्चोपाधिभेद एवेति (पृ.२२८) । मूर्तेति स्वरूपकथनम् । संयोगित्वादित्येव हेतुः व्यभिचाराभावादिति कालादयो द्रव्यसंयोगिनश्च भवन्ति । न च कालादिना संयुज्यत इति व्यभिचार इति कुचोद्यमेव । कालादिना संयुज्यत इति । कालादिनिष्ठसंयोगाधिकरणत्वं साध्यं, तच्च कालादावप्यस्ति । न हि कालनिष्ठः संयोगः काले न वर्त्तते व्याघातादिति न तेन व्यभिचारः । न च कालादिना संयोगे क्रियावत्त्वमुपाधिः । अनुत्पन्नक्रियस्य क्रियाऽभावेऽपि कालसंयोगदर्शनेन साध्याव्यापकत्वात् । न च कालसंयोगित्वे मूर्तत्वमुपाधिः मूर्तत्वं नामेयत्तावच्छिन्नपरिमाणत्वम् । न चेयत्ताविशेषणस्य विपक्षरूपं व्यावर्त्यमस्ति गुणादेर्विपक्षस्य परिमाणवत्त्वेनैव व्यावर्तितत्वात् । तस्मात्पक्षेतरत्वान्नायमुपाधिरिति । आपानत इति । अनुकूलतर्कत्वादिना विशेषग्रहणात्प्रागित्यर्थः । संयोगव्यापकत्वे हि युतसिद्धेः सिद्धे व्यापकाभावत्वाद् युतसिद्धिराहित्यं संयोगाभावं साधयत् प्रतिपक्षः स्यात् । तदेव त्वसिद्धं युतसिद्धयोरजसंयोगसाधनप्रमाणबलेन यत्र संयोगस्तत्र युतसिद्धिरिति व्याप्तेर्भङ्गात् कार्यसंयोगविषयत्वेन वा संकोचादित्यभिप्रायेण शङ्कते—संयोगगतेति । अनुकूलविरहाद् द्रव्यत्वादयो न संयोगं गमयन्ति, अनुकूलस्य चानङ्गत्वे विभागमपि गमयेयुरिति समाधत्ते—न संयोगसाधकस्येति । यद्वा, यत्र विभागस्तत्र युतसिद्धिरिति व्याप्तेः

पूर्ववद्भङ्गात्संकोचाद्वा नित्यसंयोगवन्नित्यविभागोऽपि तत एव स्यादित्याह—न संयोगसाधकस्येति । अजो विभागो न संयोगविघातकः तेन संयोगाजत्वव्याघाताभावात् । द्रव्यत्वादेः संयोगसाधकत्ववद्विभागसाधकत्वमपीष्टमेवेति कथं विभागसाधकत्वानिष्टापत्तिबलेनानुकूलतर्कस्याङ्गत्वासिद्धिरित्याशयवान् शङ्कते—अजयोरिति [पृ. २२९] । सिद्धान्तमुल्लङ्घ्य नित्यविभागमभ्युपगच्छन्तं प्रत्यनुकूलतर्कस्याङ्गत्वमग्रे व्युत्पादयिष्यते इति तदभावस्य दोषत्वं स्फुटमेवेत्युपेक्ष्याजसंयोगविभागवत्साधनस्य तर्कपराहतिमाह—न तथात्व इति । तथात्वे संयोगविभागयोर्नित्यत्वे । सतर्कतयेति । य एव विभुसंयोगसाधनप्रतिकूलः स एव तदभावसाधकव्यापकानुपलब्धेरनुकूल इत्यर्थः । विभुनोः समवायसिद्धौ प्रयुक्तस्यायुतसिद्धत्वस्यासिद्धत्वमुपपादयितुं साधारणयुतसिद्धिलक्षणमाह—उभयसाधारणमिति । तत् कथं न संयोग इति । कथं न जायत इति विवक्षितम् । संयोगाभावसाधकयुतसिद्धिराहित्यासिद्धेः कथं संयोगो नास्तीति वा ? प्रथमे दूषणम्—अस्त्येवेति । द्वितीये दूषणं—विशेषाविति । युतसिद्धिविशेषौ लक्ष्यावुपादाय द्वयोरन्यतरस्य वेति लक्षणाचिन्ता संयोगव्यापकयुतसिद्धिविशेषद्वयनिवृत्त्या संयोगाभावसाधनायेत्यर्थः । तेन युतसिद्धिविशेषद्वयाभावः संयोगाभावे मानम्, स च प्रकृते न सिद्ध इत्यर्थः । एवं तर्हि संयोगव्यापकयुतसिद्धिविशेषद्वयनिवृत्तिरूपैवायुतसिद्धिः समवाये मानमस्त्विति शङ्कते—अथेति । समवायिनोराधाराधेयभावनियामकः कार्यकारणभावः, तेन तदभावे आधाराधेयभावनियमो न स्यात् । समवायवतोश्चाधाराधेयभाव आवश्यक इति ।

किं विभक्तप्रत्यये ध्वंसवद् द्वित्वं विषय इति तेनानुविधीयते आहोस्वित् अविषयभूतमप्यस्तित्वमात्रेण ? प्रथमं दूषयति—नप्रमेयेति (पृ. २३१) । द्वित्वस्य विभक्तप्रत्ययालम्बनत्वे द्वौ विभक्तौ इति बुद्धिव्यपदेशपौनरुक्त्यापत्तेरिति भावः । द्वितीयं दूषयति—घटत्वेति । अवयवविश्लेषविनाशाविति । अवयवसंयोगनाशावयवनाशावित्यर्थः । अतिप्रसङ्गादिति । क्लृप्तसामर्थ्ययोरवयवनाशावयवसंयोगनाशयोरभावेऽपि द्रव्यनाशोत्पादे तन्त्वाद्यभावेऽपि पटाद्युत्पत्तिप्रसङ्गादित्यर्थः । यद्वा, यत्किञ्चिद्द्रव्यसंयोगाद् यस्य कस्यापि द्रव्यस्य नाशे कुम्भादिना संयोगात्पटस्यापि नाशप्रसङ्ग इति । यथा ऽवयविभूताद् द्रव्यादिसंयोगात् द्रव्यारम्भकसंयोगविरोधिविभागोत्पादकं कर्म भवतां, तथाभूतादेवास्माकं द्रव्यनाश इति नातिप्रसङ्ग इति चेत् । न, क्लृप्तसामर्थ्यावयवनाशावयवसंयोगनाशयोर्दहनाभिघातप्रभवकर्मादिजन्मनोर्बाधमन्तरेण वह्न्यभिघातादेर्द्रव्यनाशहेतुत्वे निष्प्रमाणकानियतहेतुकतापत्तेः । अथावयवनाशस्थलेऽपि तत्पूर्वकावयवसंयोगनाशस्यैव द्रव्यनाशहेतुत्वे सम्भविनि अवयवनाशस्यापि द्रव्यनाशहेतुत्वेऽनियतहेतुत्वं कथं निराकरणीयमिति चेत् । न, आश्रयनाशस्याश्रितनाशचरमकारणत्वाभावेऽवयवनाशात्तदाश्रितसंयोगविनाशस्यैवानुपपत्तेः । आश्रयनाशस्याश्रितनाशचरमकारणत्वे चावयवसंयोगनाशसमसमयमेवावयविविनाशात् तत्रावयवसंयोगनाशस्यानाशकत्वस्थितेः । व्यधिकरणत्वादिति (पृ. २३२) । अत्र हस्ततरुसंयोगादिनेति शेषः । व्यधिकरणमप्यङ्गुलिकर्म शरीरतरुसंयोगनाशकमस्तु, न चातिप्रसङ्गः स्वाश्रयाश्रितावयविपरम्परासमवेतसंयोगं प्रत्येव कर्मणो विनाशकत्वस्वीकारादिति

चेत् । न, विरोधिनः समानाधिकरणस्यैव विनाशहेतुत्वमिति सामान्यप्रवृत्तकार्यकारणभावस्य बाधकं विना विशेषनिष्ठविरोधात्। अन्यथा वह्नेर्धूमविशेष एव हेतुत्वोपपत्तेरिति। नन्वस्तु कारणभूताङ्गुलितरुसंयोगनाशो हस्ततरुसंयोगनाशकः, न चातिप्रसङ्गः, अवयवसंयोगनाशस्यावयविसंयोगनाशं प्रत्येव विनाशकत्वस्वीकारात्, तन्न युक्तमकारणनाशस्येत्यादि,इति चेत्। न, विरुद्धधर्माजन्यविनाशेऽन्वयव्यतिरेकाभ्यां हेतुनाशो विनाशक इति निर्णयादिति। शब्दसन्तान इति। मूलभूतः शब्दो विवक्षितः। द्वितीयशब्दादौ विवादाभावात्। संयोगाद्यतिरिक्तेत्यादिशब्देन शब्दमात्रविवक्षायामयमन्वयीति दर्शयति। विरूपवादिति(पृ. २३३)। यदा तु संयोगादित्यादिपदेनोभयवादिसिद्धमसमवायिकारणमात्रं विवक्षितं तदाऽयं व्यतिरेकीति दर्शयति–यद्वेति। सर्वं चैतदनुपपन्नमिति। अत्र विभागस्य संयोगेन देशकालकृते विरोधे एकदैकत्रासत्त्वेन संयोगनाशकत्वानुपपत्तेः, स्वरूपकृते च विरोधे निषेध्यनिषेधत्वलक्षणे भावत्वाभावापत्तेरिति शेषः। अभिप्रेतामिति (पृ. २३४)। अत्र तथा च द्वितीयाविभागस्यापि कर्मारभ्यत्वे विभागजविभागासिद्धिरिति शेषः। ननु द्वितीयविभागारम्भे कर्मणो द्रव्यं प्रतिबन्धकं तेन तदभावमपेक्ष्य विभागवत् कर्मापि अन्यदा द्वितीयं विभागमारभत इति संभवतीत्यत आह–विभागे कर्तव्य इति। यत्कर्म द्रव्यानारम्भकसंयोगविरोधिनं विभागमारभते न तद्द्रव्यारम्भकसंयोगविरोधिनमिति व्याप्तिः प्रसङ्गसिद्ध्यर्थं दर्शिता, प्रसङ्गविपर्ययनिदानव्याप्तिसिद्ध्यर्थं च कर्मत्वे सति द्रव्यानारम्भकसंयोगविरोधिविभागजनकव्यापकत्वे द्रव्यारम्भकसंयोगविरोधिविभागानारम्भकत्वस्य सिद्धेर्द्रव्यारम्भकसंयो-

गविरोधिविभागारम्भकत्वस्य कर्मत्वे सति द्रव्यानारम्भकसंयोगविरोधिविभागजनकत्वाभावेन व्याप्तिः सिद्ध्यति । व्यापकाभावस्य व्याप्याभावव्यभिचारस्थल एव व्याप्यव्यापकभावस्यैव भङ्गादिति । द्रव्यानारम्भकसंयोगविरोधिविभागजनकोऽपि समवायिकारणतया तन्त्वादिनिर्मितया चेश्वरादिद्रव्यारम्भकसंयोगविरोधिनं विभागं जनयतीति यत्कर्मेति विशेषितम् । प्रसङ्गविपर्ययमूलभूतां व्याप्तिमाह—यत्त्वेवमिति(पृ.२३५)। एवमिति द्रव्यारम्भकसंयोगविरोधिविभागजनकमित्यर्थः । न तदिति । अत्र कर्मत्वे सतीति शेषः । अविरोधिनमिति । अत्र विभागमारभत इत्यनुषज्यते । व्याप्तिग्रहणोपायभूयोदर्शनस्थलमाह—विकसादिति । दलादाविति । दलादिसमवेते कर्मणीत्यर्थः । द्वितीयव्याप्तेस्तन्त्वादय एव वाऽऽदिपदोपात्ताः सपक्षतयोदाहरणीयाः । प्रथमव्याप्तिरेव वा द्वितीयव्याप्तौ लिङ्गमित्युक्तम् । सत्यपि भूयः साहित्यदर्शने प्रकृतसाध्यसाधनयोर्व्यभिचारोऽस्तु विपक्षे वाधकाभावादत आह—कार्येति । कार्ययोर्विपर्ययः कार्ययाविरुद्धता यद्यनारम्भकात्तन्त्वन्तरात्तन्त्वोर्विभागारम्भकं कर्मारम्भकतन्त्वन्तरात्तन्त्वोर्विभागारम्भककर्मणा न विजातीयं तर्ह्युभयमपि द्रव्यारम्भकसंयोगविरोधिनमविरोधिनं च विभागं जनयेत् तदतिरिक्ततन्त्वदृष्टादिहेतुनाऽपि साधारणत्वेन सामग्रीभेदविरहात् । कथं तर्हि तुल्यजातीयात्कर्मणः संयोगविभागावित्यपि न युक्तम् । संयोगे पूर्वसंयोगनिवृत्तेर्विभागे पूर्वसंयोगस्यैवासाधारणहेतोः सामग्रीभेदापादकस्य सत्त्वात् । अन्यथा तयोरप्यैक्यस्य दुर्वारत्वात् । तस्माद् द्रव्यारम्भकसंयोगविरोधिद्रव्यानारम्भकसंयोगविरोधिविभागरूपकार्योत्पादक-

सामग्रीभेदसिद्धये विभागद्वयारम्भककर्मणः परस्परव्यावृत्तं जातिद्वयमङ्गीकरणीयम् । एवं च सति यदि द्रव्यानारम्भकसंयोगविरोधिविभागारम्भकं कर्म क्वचिद्द्रव्यारम्भकसंयोगाविरोधिनं विभागं जनयेत्, यदि च द्रव्यारम्भकसंयोगाविरोधिविभागारम्भकं कर्म क्वचिद् द्रव्यानारम्भकसंयोगविरोधिनं विभागं जनयेत्, तर्हि द्रव्यानारम्भकसंयोगविरोधिद्रव्यारम्भकसंयोगविरोधिविभागारम्भकं कर्म गतयोः परस्परपरिहारवत्योरेकत्र समावेशप्रसङ्ग इति व्याप्तिद्वयोपयोगितर्कद्वयं सिध्यति । अथ तन्त्वादावेव द्रव्यानारम्भकसंयोगविरोधिद्रव्यारम्भकसंयोगविरोधिविभागद्वयसिद्धये वैजात्यं किं न कल्प्यते इति तु न वाच्यमेव एकस्यैव तन्त्वादेर्द्रव्यानारम्भकसंयोगाविरोधिद्रव्यारम्भकसंयोगविरोधिविभागारम्भकत्वेनोभयजातिमत्त्वास्थितौ ततः सर्वदोभयात्मकविभागोदयप्रसङ्गादिति, तदाह—न हीति । अविरुद्धजातीयं चेति । अत्र समग्रमिति शेषः । आद्यव्याप्तेः फलं प्रसङ्गमाह—तदिहेति । द्वितीयव्याप्तेः फलं प्रसङ्गविपर्ययमाह—जनयति चेति । प्रसङ्गविपर्ययादि चोत्तरभाष्यप्रतिपाद्यमविशिष्यापतितयाऽत्र दर्शितम् । प्रयोगस्तु द्रव्यारम्भकसंयोगविरोधिविभागारम्भकं कर्म न कर्मत्वे सति द्रव्यानारम्भकसंयोगविरोधिविभागजनकं द्रव्यसंयोगविरोधिविभागारम्भकत्वात् तादृक्तन्तुवदिति । न च द्रव्यारम्भकसंयोगाविरोधिविभागारम्भकं कर्म द्रव्यानारम्भकसंयोगविरोधिविभागजनकं कर्मत्वात् पद्मपत्रोन्मीलनकर्मवदित्यादिना सत्प्रतिपक्षत्वम् । अनुकूलाविरहोक्तिप्रतिकूलतर्कपराहतिभ्यामेवमादेः पूर्वस्माद् दुर्बलत्वादिति । यथा विकासितकमलदलसम्मीलनकर्मेति । अत्र तदिहारम्भकसंयोगा-

रम्भकं कर्म यथा आकाशादिना द्रव्यानारम्भकसंयोगं जनयेत् तर्हि द्रव्यारम्भकसंयोगं जनयेत् । जनयति च, तेन द्रव्यानारम्भकसंयोगं जनयतीत्याद्यनुसंधेयम् । ननु एकः संयोग आरम्भकोऽनारम्भकश्चान्यस्मात् कथं स्वरूपतो विरोधाभाव इत्यत आह—अनारम्भकेति । नतु स्वरूप इति । अत्र तथा च यदनारम्भकसंयोगजनकं कर्मेति यदनारम्भकद्रव्यसमवेतं कर्मेति फलतीति शेषः । त्रिविधमिति उपलक्षणं स्पर्शरहितविनश्यदवस्थसंयोगनिष्पलारम्भाणामप्यनारम्भकत्वात् । न हि मनोद्वयं विनश्यदवस्थतन्तुद्वयं विनश्यदवस्थसंयोगं तन्तुद्वयं द्व्यणुकद्वयं चारम्भकमिति । तस्मादारब्धद्रव्यमन्त्यावयविविजातीयं स्पर्शरहितं विनश्यदवस्थं विनश्यदवस्थसंयोगं निष्पलारम्भं चेति सप्तविधं प्रथममनारम्भकमिति द्रष्टव्यम् । न चैवंभूते वर्तमानं कर्मैवंभूतेनैवेति विजातीयेनारम्भके वर्तमानं विजातीयेनैवान्त्यावयविन्यनारम्भके वर्तमानमन्त्यावयविनैवारब्धे द्रव्ये चानारम्भके वर्तमानमारब्धद्रव्येणैव संयोगमारभते इति च नियम इत्यर्थः । अनेवंभूतेन वेति । वाशब्द इवार्थे । विजातीये वर्तमानं कर्म विजातीयेनैव संयोगमारभते इति नियमभङ्गमाह—पृथिव्यामिति । पृथिव्यन्तरपाथःपदयोः स्थानव्यत्यासो वत्यपिशब्दव्यत्यासश्च द्रष्टव्यः । तेन पाथोवत् पृथिव्यन्तरेणापि संयोगजननादिति द्रष्टव्यम् । अन्यथा प्रकृतानुपयोगादिति । अन्त्यावयविकर्मान्त्यावयविनैव संयोगमारभत इत्यस्य व्यभिचारमुदाहरति—स्थाणुवर्तिनेति । आरब्धं द्रव्यगतकर्मारब्धद्रव्येणैव संयोगमारभते इत्यत्रापि व्यभिचारमाह—कमलदलेति । विभागे तु स्वभावविरोधादिति । न हि द्रव्यार-

म्भकसंयोगविरोधित्वे विभागस्यारब्धद्रव्यसमवेतत्वं प्रयोजकम् । पद्मदलोन्मीलनकर्मजविभागस्यापि तथात्वप्रसङ्गात् । नापि द्रव्यानारम्भकसंयोगविरोधित्वं विभागस्यानारम्भकद्रव्यसमवेतत्वं प्रयोजकम् । आरब्धद्रव्यतयाऽऽरम्भकपद्मदलसमवेतद्रव्यारम्भकसंयोगविरोधिनोऽपि विभागस्य द्रव्यानारम्भकसंयोगविरोधित्वप्रसङ्गात् । तस्माद् द्रव्यारम्भकसंयोगतदनारम्भकसंयोगविरोधिनो विभागाः स्वरूपेणेति तयोर्विरोध इति तज्जनककर्मवैचित्र्यसिद्धिरिति व्यभिचारं दर्शयति—उत्तरेति(पृ. २३६)। ननु यस्मिन्परमाणौ क्रियोत्पन्ना तत्रैव कारणयोर्वर्तमानो विभागमाकाशेनारभते न तु द्वितीयपरमाणाविति कुत इति शङ्कापरिहारत्वेन "न निष्क्रियस्य कारणाभावात्" इति भाष्यं कारणविभागेन विभागमारभतो निमित्तकारणत्वेनापेक्षणीयस्य कर्मणोऽभावादिति श्रीधराचार्यादिभिर्व्याख्यातं, तदयुक्तम् । द्रव्यारम्भकसंयोगविरोधिविभागारम्भकस्य कर्मणो द्रव्यानारम्भकत्वं स्वोत्पत्त्युत्तरक्षणे एव विभागारम्भकत्वेन व्याप्तम् । अत उत्तरविभागं प्रति स्वोत्पत्त्युत्तरक्षण एवारम्भकत्वं प्रकृतात्कर्मणो व्यावर्तमानं तस्यासमवायितया द्वितीयविभागारम्भकत्वं निवर्तयतीति कारणविभागस्यासमवायिकारणत्वसिद्धिरिति चेत् । न, कर्मणो विभागारम्भकत्वमात्रस्य स्वोत्पत्त्यनन्तरमेव विभागारम्भकत्वेन व्यभिचाराभावेनासमवायिकारणत्वेन विशेषणानुपपत्तेः । असमवायिकारणत्वस्य च क्वचिदप्रसिद्धौ तस्य व्याप्यांशे विनिवेशो व्यापकनिवृत्त्या च तन्निवृत्तिरशक्या । अवधृतसामर्थ्यत्वादिना क्वचिदसमवायिकारणत्वसिद्धौ तु तेनैव न्यायेन द्वितीयविभागेऽपि कर्मणोऽसमवायिकारणत्वसिद्धेर्बाधः । अवधृतसामर्थ्यमपि नेदं

प्रत्यासत्त्युपधानेनावधृतसामर्थ्यमिति चेत् । न, प्रत्यासत्तेरनुपाधित्वे सक्रियपरमाणुकर्मसापेक्षात् कारणविभागान्निष्क्रियेऽपि विभागोदयस्य भवतामपि दुर्वारत्वात् । कर्मणो विभागारम्भकत्वं स्वोत्पत्त्यनन्तरमेव विभागारम्भकत्वेन व्याप्तं तन्निवृत्तौ निवर्तत इत्यादिना कारणत्वमात्रप्रतिक्षेपाच्च, अनुकूलविरहस्यासमवायिकारणत्वप्रतिक्षेपेऽपि तुल्यत्वात् । अथाकर्मणो निमित्तत्वे निष्क्रियस्यापि कारणविभागाद् विभागः स्यादिति चेत् । सत्यं, भवत्येव । हेतुसाकल्याद् विभागात् निष्क्रियस्यापि पूर्वसंयोगनिवृत्तिः स्यात् इति चेत् । सत्यं, भवत्येव । उत्तरसंयोगोऽपि तर्हि स्यादिति चेत् । न, तद्धेतुकर्माभावात् । उत्तरसंयोगानुपपत्तौ विभागस्य कुतो नाश इति चेत् । आशुविनाशित्वे विभागस्य निमित्तकारणनाशान्नाश ईश्वरापेक्षाबुद्धिजन्यपरमाणुद्वित्वस्येव, कालान्तराविनाशित्वे तु कालान्तरोत्पन्नकर्मजन्योत्तरसंयोगादिति यो विभागो नासौ निमित्तकारणादृष्टनाशनश्यः, यश्च संयोगो यस्य विभागस्य नाशको स तद्विभागजनककर्मजन्य इत्यादेरनुकूलतर्कविरहेणाप्रयोजकत्वादिति । पूर्वसंयोगनाशे उत्तरसंयोगोत्पत्तौ चाकाशादिना संयुक्तः परमाणुः कथमवतिष्ठेत ? कथं च सर्वमूर्तसंयोगित्वलक्षणाकाशादेः सर्वगतत्वम् ? इति चेत् । पूर्वसंयोगनिवृत्तिलक्षणप्रलयावस्थयोरिवेति मूकीभव । तस्मादनुपपन्नमिदं भाष्यव्याख्यानमिति मन्वानो यदि द्वितीयविभागो न कर्मजस्तर्हि कर्मनिवृत्तौ सत्यां स्यात् न तु कर्मण्यनुवर्तमान इति शङ्कापरिहारत्वेन प्रकृतानुवादपूर्वकं भाष्यमवतारयति—**सक्रिये**त्यादिना (पृ.२३७) । क्रियानिवृत्तौ कारणं नास्तीति क्रियानिवृत्तिस्वर्जनीयतया न हेतुतयेत्यर्थः । नन्वस्तु विभाग एव

क्रियानिवर्तकः किमुत्तरसंयोगेन तत्कर्थं पूर्वक्रियानिवृत्तौ हेत्वभाव इत्याशङ्कापरिहारत्वेन कारणाभावादिति व्याख्यातम्। एवं भाष्यमुत्तरसंयोगानुत्पत्तावित्यादिनैकं वाक्यं कृत्वा पुनरवतारयति–यदि वेति(पृ. २३८)। ननु विभागेनैव सफलत्वात् कथं कर्मणोऽनुपयोग्यत्वमत आह—उत्तरसंयोगेति। यद्युत्तरसंयोगः क्रियाफलं न स्यात् ततो हेत्वन्तराभावान्न स्यादेव। विभागाद्भविष्यतीति चेत्। न, सक्रियवन्निष्क्रियेऽपि तन्त्वादौ उत्तरसंयोगापत्तेर्हेतुसाकल्यात्। तथा च निष्क्रियस्यापि तन्तोः समीपवर्तितन्त्वन्तरसंयोगात्तदारब्धद्वितन्तुकयोरुपलम्भापत्तिरिति भावः। यद्यपि द्रव्यारम्भकसंयोगविरोधिविभागारम्भकस्य कर्मणो द्रव्यानारम्भकसंयोगविरोधिविभागारम्भकत्वं निरस्तमेव तथापि बाधकान्तरमवतारयितुं तदेव शङ्कते–यद्येवमेतावन्तामिति। अपेक्षाकारणमुक्तमिहत्र तेन कारणाकारणविभागे विभागानपेक्षकारणं कर्मेति लक्षणं नातिव्यापकमिति भावः। युतसिद्धिरिति[पृ. २३९]। किमवयवे चलत्यपि अवयविनोऽचलनं विभज्यमानेऽप्यविभागो वा संयुज्यमानेऽप्यसंयोगो मिथोविभागो वाऽसमवायो वेत्यर्थः। आद्ये पक्षत्रये दूषणमाह–न तावदिति[पृ.२४०]। यदि चलाचलत्वेन चलाचलत्वं विभज्यमानत्वाऽविभज्यमानत्वेन विभज्यमानत्वाविभज्यमानत्वं संयुज्यमानत्वासंयुज्यमानत्वेन च संयुज्यमानत्वाऽसंयुज्यमानत्वमापद्यते तत्रादोषः। तेनैव तदापादनेति। अथ चलाचलत्वेन विभज्यमानत्वाविभज्यमानत्वादि विभज्यमानाविभज्यमानत्वादिना चलाचलत्वादिकमापद्यते तत्र दोषः—अस्यार्थस्येति। चतुर्थपञ्चमपक्षयोः किमयं युतसिद्धिप्रसङ्गाऽविपर्ययपर्यवसितो वास्तवमिथोविभागित्वं संयोगित्वं तेन च-

लाचलत्वादिकमपि नास्तीति किं वा युतसिद्धिपर्यवसितः चलाचलत्वादेर्मिथोविभागित्वं संयोगित्वं च वाऽस्तीति ? तत्र प्रथमवत्पक्षोऽनुपपन्नः । अवयवचलाचलत्वादिसत्त्वेऽप्यवयविचलाचलत्वग्राहकप्रमाणेन यथास्थानोपपादितेन प्रसङ्गविपर्ययस्य बाधादिति मन्वानो द्वितीयपक्षे मिथोविभागित्वे साधने तद्व्यापकसंयोगित्वाभावेन बाधः संयोगित्वेन सोपाधिकत्वमित्याह—नाप्यवयवेति । संयोगित्वसाधने तु तद्व्यापकाप्राप्तिविरहेण वा बाधः प्राप्त्या सोपाधित्वं चेत्याह—नापि संयोगित्वमिति । एतेन यत्केनचिदुक्तं संयोगे बाधाद्यभिधानमयुक्तं प्रमितिभावापादनस्यैव प्रसङ्गत्वादिति, तत् परिहृतम् । प्रसङ्गसाधनमिदं युतसिद्धौ साधनमिति पक्षे दोषाभिधानादिति । षष्ठे पक्षे दूषणमाह—नाप्यसमवाय एवेति । तत्र हेतुमाह—गुणादावपीति । यद् यस्मिन् चलति न चलति, यस्मिन् संयुज्यमाने यन्न संयुज्यते, यस्मिन्विभज्यमाने यन्न विभज्यते, तयोरसमवाय एवेति नियमः, तर्हि द्रव्ये चलनादिमत्यपि गुणादेरचलनात् तयोरसमवायप्रसङ्गः । अन्यथा तु मूलशैथिल्यात् । अवयवावयविनोः समवायाभावापादनं प्रसङ्गाभास इत्यर्थः । नन्वियं युतसिद्धिरस्यैवावयवाऽवयविनोरित्यत्र तेन समवायो न स्यात्, युतसिद्धेरसमवायिव्याप्यत्वादिति भावः । इदं च चोद्यम् । पृथग्गतिमत्त्वं मिथोविभागहेतुक्रियासंबन्ध इत्यगृहीत्वा किन्तु पृथग्गतिमत्त्वं देशादेशान्तरगमनं युतसिद्धिः, सा चास्ति नष्टे तदेशादेशान्तरं गच्छतस्तन्तवादेरिति मन्वानस्य । अन्यथाऽवयवावयविनोर्विभागहेतुक्रियाभावादितीयं युतसिद्धिरस्त्येव । अवयवावयविनोरिति व्याकोपात् । यद्वा, देशादेरवयवस्य परावृत्य मध्यभागावच्छिन्नपटेन संयोगविभा-

गहेतुकर्मतया शक्यापादनमित्यभिप्रायवान् शङ्कते—नन्वित्यमिति । अत्र प्रथमव्याख्याने पृथग्गतिमत्त्वं मिथोविभागहेतुक्रियासंबन्धो युतसिद्धिः । सा च नास्त्येवावयविनोर्भवतु वा, तथापीयं युतसिद्धिर्नित्यानामेवासमवायनियता न त्वनित्यानामिति सिद्धान्तभाष्याभिप्रायः । द्वितीयव्याख्याने त्ववयवावयविनोर्मिथोविभागहेतुः कर्म दुरुपपादमेव, भवतु वा, तथापीयं युतसिद्धिर्नित्यानामेवासमवायसहकारिणीत्यभिप्रायः। अपृथगाश्रयसमवेतानामिति । एकाश्रयसमवेतानामित्यर्थः स्यात् भिन्नाश्रयासमवेतानामिति वा? प्रथमे उत्तरमाह—तथा चेति । द्वितीयमुत्तरयति—समवायाभावेनेति। अवयवसंयोगनाश इति(पृ.२४२)। अत्र पूर्वद्रव्यविनाशात् संयोगान्तरानुपपत्तौ चेति शेषः । द्रव्येति । द्रव्यान्तरेति विवक्षितम् । कुतः संयोगान्तरानुपपत्तिरित्याशङ्क्य संयोगान्तरोत्पादककर्महेतोर्नोदनादेरभावादित्याह—नोदनेति । नोत्पद्यतां तर्हि कार्यान्तरं किं नश्छिन्नमत आह—तत्कार्यस्येति । मा भूच्चिरकालावस्थायित्वं विभागस्योत्तरसंयोगनाश्यत्वं तु कुत इत्यत आह—न चेत्यादिना प्रायणाद्यनुपपत्तिप्रसङ्गादित्यन्तेन(पृ.२४३) । तन्त्वन्तरे च कर्मेति (पृ. २४४) । अविभज्यमानावयवे तन्तावित्यर्थः । यस्मिन् क्षणे तन्तुनाशाद्वितन्तुकारम्भकसंयोगनाशस्तस्मिन् क्षणे तन्त्वोर्विभागात् पूर्वक्षणवर्तिनः कर्मणो वा तन्त्वाकाशविभागः किं न स्यादित्याशङ्क्य व्याचष्टे—कारणविभागेनेति । शेषं सुगमम् ॥

परस्परानुबद्धकारणतयेति (पृ. २४९) । अन्योन्यानुगतकारणतया यदेव परत्वेन समवायितया कारणमपेक्ष्यते तदेवापरत्वेनावधितया सन्निकृष्टबुद्धिमुत्पादयति,

कालादयश्चानुगता एवेति । ननु परापरव्यवहारयोः संयुक्तसंयोगभूयस्त्वाल्पीयस्त्वाभ्यामुत्पत्तेर्न ततोऽधिकपरत्वापरत्वे प्रमाणमिति शङ्कते—संयोगेति । समाधत्ते—नेति । तदपेक्षयेति । परप्रमितिविषयापेक्षयेत्यर्थः । संयोगबहुत्वभावस्येति । यैव हि संयुक्तसंयोगपरम्परा देवदत्तमवधीकृत्य प्रमेये पर्यवसिता सैव प्रमेयमवधीकृत्य प्रमातरि देवदत्तेऽपि पर्यवसिताऽतः सा चेदल्पसंयोगवन्तमपेक्ष्य प्रमेये परव्यवहारं जनयेत् तर्हि प्रमातर्यपि जनयेदित्यर्थः । अथ सत्यमेकैकसंयुक्तसंयोगपरम्परा प्रमातृप्रमेययोः सत्त्वाश्रिततया परव्यवहारविषयः । तेन यदा तावद्देवदत्तमवधीकृत्य प्रमेयाश्रयतयाऽवभासते तदा प्रमेयवद्देवदत्तेऽपि परव्यवहारापत्तिः तस्यावच्छेदकतया प्रतीयमानत्वेन तदाश्रयतया संयोगपरम्परायाः अप्रतीतेः । यदा तु प्रमेयमवधीकृत्य देवदत्ताश्रयतया संयुक्तसंयोगपरम्परा चकास्ति तदा विशिष्ट एव प्रमातर्यपि परादिव्यवहार इत्याशङ्क्य प्रमात्राश्रयतया संयुक्तसंयोगपरम्पराऽनुसन्धानेऽपि न तत्र परादिव्यवहार इति दर्शयति—भवतीति हीति । यैव मामवधीकृत्य संयुक्तसंयोगपरम्परा वाराणस्यां सैव वाराणसीमवधीकृत्य मयीत्यनुसन्धानेऽप्यहं वाराणसीतः परतोऽर्वाग्वेति परापरव्यवहाराविति अत्रानुभवः प्रमाणमित्यर्थः । किञ्चिदपेक्ष्येति । अनियतमित्यर्थः । तदविशेषणादिति । संयुक्तसंयोगपरम्परायाः प्रमातृप्रमेययोरविशेषादित्यर्थः । कारणेति । किञ्चिदेव प्रमातृव्यतिरिक्तं स्वात्मनि परत्वारम्भे शक्तं गगनमिवात्मनि शब्दारम्भे । तेन संयुक्तसंयोगपरम्परायाः उभयाश्रयत्वेऽपि प्रमेय एव परत्वादिनियमो(यथा)भ्यर्काकाशसंयोगस्योभयाश्रयत्वेऽपि गगने शब्दोदयनियम इत्यर्थः । यद्वा,